THIRD SANSKRIT COURSE.

M. S. GOLE.

Price 8 Annas.

The New Sanskrit Reader Series-

THIRD SANSKRIT COURSE.

FOR

STANDARDS VI & VII

BY

MAHADEV SHIVRAM GOLE, M. A.,
PRINCIPAL, FERGUSSON COLLEGE, POONA.

POONA:
PRINTED AT THE "ARYA-BHUSHANA PRESS."

1899

Price 8 Annas.

THIRD SANSKRIT COURSE.

PREFACE.

As announced in the preface to the Second Sanskrit Course, this volume completes the treatment of elementary grammar as far as is required for candidates preparing for the Matriculation Examination. The book may be introduced into the Sixth Standard and completed in the Seventh. The Second and the Third Course taken together will give to the student a very good knowledge of Sanskrit grammar and a very fair acquaintance with classical Sanskrit literature and idiom.

Some of the special features of this volume may be mentioned here. The subject of *Nominal Verbs*, which are of so frequent an occurrence in literature, was not, till now, given its proper place in Sanskrit text-books, although it admits of a very simple and easy treatment. This subject is for the first time fully treated and illustrated in this Course. Secondly, a rather cursory treatment of the *Krit* and *Taddhit* suffixes is introduced into the present volume. A knowledge of these suffixes is indispensable to the student, for without it he cannot either interpret or derive for himself words that are constantly met with or required in translating from or into Sanskrit. Finally, to give a completeness to the treatment of Grammar an appendix has been added to illustrate the formation of Frequentative or Intensive Verbs from primary roots, mentioning such forms and derivatives as are frequently met with.

The Sanskrit passages for translation into English are, for the most part, selected from the very best classi-

cal authors. The remarks made in regard to the passages of the Second Course, apply equally to those of this Course. In selecting them "care has been taken that these passages should not merely illustrate points of grammar and idiom, but should also be interesting and instructive in themselves. The student, it is hoped, will be able to commit the verses to memory without much effort the sonorousness of the language itself proving a great attraction." Lastly, one improvement in the present Course may here be noticed. The Notes to the Sanskrit and English passages in each lesson are placed at the end of that lesson, and not, as in the Second Course, at the end of the book. The explanations are, likewise, fuller and will help the students to thoroughly understand the passages and to translate them without external help.

It is hoped that the above special features will make this volume more acceptable to Sanskrit teachers and better adapted to the wants of the students of our High Schools. Candidates who are making up their Sanskrit studies privately will likewise derive much benefit by going carefully, at least once, through the three Sanskrit Courses.

My special thanks are due to Mr. K. G. Oka, Sanskrit teacher, N. E. School, Poona, who has helped me throughout, not only in the preparation of this volume, but of the whole of this Sanskrit Series.

POONA:
FERGUSSON COLLEGE,
12th April, 1899.

M. S. GOLE,

THIRD SANSKRIT COURSE.

INTRODUCTION.

I.

Rules of Reduplication.

Rule 1. Reduplication consists in doubling the initial vowel or the initial consonant with the following vowel of a root, the syllable thus prefixed to the root being called the *reduplicative syllable*. *E. g.*

Rt. इष् reduplicated इइष् । Rt. पच् reduplicated पपच् ।
तुद् " तुतुद् । लिह् " लिलिह् ।

Rule 2. If a root begins with a conjunct consonant, the first consonant only with the following vowel is reduplicated. *E. g.*

Rt. त्यज् reduplicated तत्यज् । Rt. व्रज् reduplicated वव्रज् ।
ग्रु " जुग्रु । स्वन् " सस्वन् ।
श्रम् " शश्रम् । श्रु " शुश्रु ।

Exceptions. If the conjunct consonant consists of a sibilant followed by a hard consonant, the latter together with the following vowel is reduplicated. *E. g.*

Rt. स्तम्भ् reduplicated तस्तम्भ् । Rt. श्चुत् reduplicated चुश्चुत् ।
स्पन्द् " पस्पन्द् । श्च्युत् " चुश्च्युत् ।

Rule 3. The reduplicative syllable undergoes modifications in the following cases :—

(*a*) The aspirate consonant is changed to the corresponding unaspirate in the reduplicative syllable. *E. g.* छिद् (छिछिद्)-चिच्छद् (S. R. 12); फल्-पफल्; धु-दुधु; भुज्-बुभुज्; स्फुर्-पुस्फुर् (Rule 2, Excep.); ष्ठिव्-टिष्ठिव्; &c. (It should be observed that when the initial consonant of a root is unaspirate, no change is required).

(*b*) A guttural is changed to the corresponding palatal, and ह् to ज् in the reduplicative syllable. *E. g.* कम् (ककम्)-चकम्; खन्-चखन्; गम्-जगम्; घस्-जघस्; हस्-जहस्; हु-जुहु; स्कन्द्-चस्कन्द्; स्खल्-चस्खल्; &c.

(*c*) Long vowels are shortened; ऋ, ॠ and ऌ are changed to अ; ए and ऐ to इ; and ओ and औ to उ in the reduplicative syllable. *E. g.* धा (धाधा-दाधा)-दधा; नी-निनी; ह्री-जिह्री; भ्राज्-बभ्राज्; कूज्-चुकूज्; कृ-चकृ; पॄ-पपॄ; कॢप्-चकॢप्; स्मृ-सस्मृ; वेपृ-विवेपृ; ढौकृ-डुढौकृ; &c.

Rule 4. (*a*) In the third variety of the Aorist and in the Desiderative, when a root begins with a vowel, the following consonant is reduplicated, (contrary to Rule 1), and इ added to it. *E. g.*

Rt. अट्	reduplicated	अट्ट्	with इ added to it	अटिट्।
इष्	,,	इष्ष्	,,	इषिष्।
ईक्ष्	,,	ईच्क्ष्	,,	ईचिक्ष्।

(*b*) If a conjunct consonant with a soft unaspirate letter or a nasal or र् as its first member follows the initial radical vowel, the second member is reduplicated and इ added to it. *E. g.*

Rt. उब्झ्	reduplicated	उब्झ्झ्	with इ added	उब्झिझ्=उब्जिझ्।
अञ्ज्	,,	अञ्ज्ज्	,,	अञ्जिज्=अञ्जिज्।
उन्द्	,,	उन्द्द्	,,	उन्दिद्=उन्दिद्।
अर्ह्	,,	अर्ज्ह्	,,	अर्जिह्=अर्जिह्।

II.

Special Sandhi Rules.

S. R. 38. Roots beginning with स् followed by a vowel or a dental consonant, and the roots स्मि, स्वप्, स्वञ्ज्, स्वद् and स्विद् change their initial स् to ष् when preceded by the इ or उ of the reduplicative syllable. *E. g.* सू—सुषू; सेव्—सिषेव्; स्तु—तुष्टु; स्निह्—सिष्णिह्; स्मि—सिष्मि; स्विद्—सिष्विद्; &c. (This is not applicable to the roots सेक्, सृप्, सृ, स्तृ, सृज्, स्तृ and स्त्यै). Also observe Articles 57 and 58 of the First Sanskrit Course in joining Prefixes to radical bases. *E. g.* प्र+नम्—प्रणनम्; नि+सद्—निषसद्; अभि+सिच्—अभिषिषिच्; &c.

S. R. 39. When the reduplicative इ or उ is followed by the radical इ, ई or उ, ऊ, the two combine into ई or ऊ according to the usual rule; but when the reduplicative इ or उ is followed by a dissimilar vowel, the इ or उ is changed to इय् or उव् respectively. *E. g.*

Rt. इष्—इइष् = ईष्; but इएष् = इयेष्।
उख्—उउख्=ऊख्; but उओख्=उवोख्।

S. R. 40. The terminations ध्वे, ध्वम् and सीध्वम् (changeable to षीध्वम् by S. R. 20) occurring in the Perfect, the Aorist and the Benedictive are changed to ढ्वे, ढ्वम् and षीढ्वम् when immediately preceded by र् or any radical vowel except अ or आ. It is optionally so changed when preceded by the intermediate इ following य्, र्, ल्, व् or ह्. *E. g.* चकृ+ध्वे=चकृढ्वे; तुष्टु+ध्वे=तुष्टुढ्वे; अने+ध्वम्=अनेढ्वम्; अस्तृ+ध्वम = अस्तृ+ढ्वम्=अस्तीर्ढ्वम् (S. R. 30, *b* and *c*); लुलु+इध्वे = लुलुविध्वे or लुलुविढ्वे (S. R. 31, *b*); चिक्री+इध्वे= चिक्रियिध्वे or चिक्रियिढ्वे (S R 31, *a*); जुगुह्+इध्वे=जुगुहिध्वे or जुगुहिढ्वे; अस्तृ+इध्वम्=अस्तरिध्वम् or अस्तरिढ्वम्; कृ+सीध्वम्= कृषीढ्वम्; &c.

LESSON I.

The Perfect.

1. The Perfect is formed either by reduplication or by joining auxiliary verbs to the root. The former is called the Reduplicated Perfect and the latter the Periphrastic Perfect.

The Perfect is used to describe events which took place in the remote past and were not witnessed by the speaker. Hence it is not used in the First Person and rarely in the Second. When used in the First Person, it would mean as if the action was done unconsciously through intoxication, madness, &c., that is, as if in the opinion of the speaker, the action was performed without his right cognizance.

2. (1) The Reduplicated Perfect is formed of all monosyllabic roots of the first nine Conjugations.

Exceptions. The roots इय्, अय्, कास्, आस्, and those beginning with ए and ओ, or with इ, उ and ऋ prosodially long take the Periphrastic Perfect only.

(2) The Periphrastic Perfect is formed (*a*) of all roots of the 10th Conjugation, Causals and other derivative verbs ; (*b*) of primitive roots of more than one syllable, and of those mentioned above as exceptions under (1).

(3) Both the Perfects may be formed of the primitive roots उष्, विद् 'to know', जागृ and दरिद्रा, and also of भी, ह्री, भृ and हु.

3. The terminations of the Reduplicated Perfect are :

	PARASMAIPADA.			ATMANEPADA.		
	Singular.	*Dual.*	*Plural.*	*Singular.*	*Dual.*	*Plural.*
1st.	**अ**	व	म	ए	वहे	महे
2nd.	**थ**	अथुः	अ	से	आथे	ध्वे
3rd.	**अ**	अतुः	उः	ए	आते	इरे

The strong terminations in the above scheme are shown in black type. They are the terminations of the singulars of three Persons in the Parasmaipada. The rest of the terminations are all weak.

Note. Roots ending in आ take the termination औ instead of अ in the First and the Third Person singular.

The final आ of the bases of such roots is dropped before all weak terminations and before थ with the intermediate इ.

Roots ending in ए, ऐ and ओ are to be considered as ending in आ in the Perfect as in all the other General Tenses. (See Art. 90 of the S. S. Course).

4. *Formation of the base of the Reduplicated Perfect.* The root is reduplicated according to the Rules (1, 2 and 3) given in the Introduction. The reduplicated root is itself the weak base. The strong base of the Third Person singular is derived from the weak base by substituting Vriddhi for the final radical vowel and the penultimate अ, and Guṇa for any other penultimate short vowel. The strong base of the Second Person singular is formed by guṇating the final vowel and the penultimate short. The strong base of the First Person singular may be formed optionally like that of the Second or the Third Person singular. (For examples see below.)

Penultimate long vowels as well as those that are prosodially long remain unchanged before both strong and weak terminations.

5. Terminations beginning with vowels are directly applied to the base, strong or weak ; those beginning with consonants are applied with the intermediate इ, except in certain cases which are mentioned below. When इ is prefixed to the consonantal terminations, they become practically vowel terminations. Thus,

Rt. दुह् U. (st. base दुदोह्, w. base दुदुह्).

	Parasmaipada.			Atmanepada.		
	Singular.	*Dual.*	*Plural.*	*Singular.*	*Dual.*	*Plural.*
1st.	दुदोह	दुदुहिव	दुदुहिम	दुदुहे	दुदुहिवहे	दुदुहिमहे
2nd.	दुदोहिथ	दुदुहथुः	दुदुह	दुदुहिषे	दुदुहाथे	दुदुहिध्वे-ढ्वे
3rd.	दुदोह	दुदुहतुः	दुदुहुः	दुदुहे	दुदुहाते	दुदुहिरे

Rt. कूज् P. (base चुकूज्) and शी A. (base शिशी.)

चुकूज	चुकूजिव	चुकूजिम	शिश्ये	शिश्यिवहे*	शिश्यिमहे
चुकूजिथ	चुकूजथुः	चुकूज	शिश्यिषे	शिश्याथे	शिश्यिध्वे-ढ्वे
चुकूज	चुकूजतुः	चुकूजुः	शिश्ये	शिश्याते	शिश्यिरे

Rt. इष् P. (st. b. इयेष्, w. b. ईष्), and सू A. (base सुषू).

इयेष	ईषिव	ईषिम	सुषुवे	सुषुविवहे	सुषुविमहे
इयेषिथ	ईषथुः	ईष	सुषुविषे	सुषुवाथे	सुषुविध्वे-ढ्वे
इयेष	ईषतुः	ईषुः	सुषुवे	सुषुवाते	सुषुविरे

---

* The rule 31 (*a*) of Internal Sandhi is to be observed here. It should be remarked that the rule is applicable not only in cases where dissimilar vowels meet, but also where similar vowels meet. Thus, शिशी + इवहे = शिश्यिवहे, &c.

Rt. श्रि U. (st. base शिश्रै or शिश्रे, w. base शिश्रि).

P. शिश्राय or शिश्रय	शिश्रियिव	शिश्रियिम
शिश्रयिथ	शिश्रियथुः	शिश्रिय
शिश्राय	शिश्रियतुः	शिश्रियुः
A. शिश्रिये	शिश्रियिवहे	शिश्रियिमहे
शिश्रियिषे	शिश्रियाथे	शिश्रियिध्वे-ढ्वे
शिश्रिये	शिश्रियाते	शिश्रियिरे

Note. The application of general Sandhi Rules given in the Introduction to the Second Sanskrit Course and that of special Sandhi Rules given in the Introduction to this Course, should be pointed out in every case by the teacher.

Similarly may be conjugated बुध्, कम्प्, पू, निन्द्, विद्, हस्, आप्, कम्, कुष्, क्रम्, द्विष्, नृत्, मुच्, रुद्, रुध्, लुप्, वृत्, वृध्, युज्, शास्, श्वस्, सिच्, स्पृश्, &c.

The *Set* roots कुट्, त्रुट्, स्फुट्, स्फुर्, नू and धू of the 6th Conjugation, and विज् 'to tremble' do not take Guṇa before थ with the intermediate इ.

6. The intermediate इ is *not* inserted before the consonantal terminations in the case of कृ, सृ, भृ, वृ, स्तु, द्रु, स्रु and श्रु. Thus,

Rt. कृ U. (st. b. चकार् or चकर्, w. b. चकृ).

Parasmaipada.			Atmanepada.		
Singular.	*Dual.*	*Plural.*	*Singular.*	*Dual.*	*Plural.*
चकार or चकर	चकृव	चकृम	चक्रे	चकृवहे	चकृमहे
चकर्थ	चक्रथुः	चक्र	चकृषे	चक्राथे	चकृढ्वे
चकार	चक्रतुः	चक्रुः	चक्रे	चक्राते	चक्रिरे

Rt. स्तु U. (st. b. तुष्टौ or तुष्टो, w. b. तुष्टु).

तुष्टाव or तुष्टव	तुष्टुव	तुष्टुम	तुष्टुवे	तुष्टुवहे	तुष्टुमहे
तुष्टोथ	तुष्टुवथुः	तुष्टुव	तुष्टुषे	तुष्टुवाथे	तुष्टुढ्वे
तुष्टाव	तुष्टुवतुः	तुष्टुवुः	तुष्टुवे	तुष्टुवाते	तुष्टुविरे

Note. The root वृ forms ववरिथ in the Second Person singular.

7. *Anit* roots ending in ऋ do not take the intermediate इ before थ, and those containing अ or ending in a vowel other than ऋ take it optionally. (Before other consonantal terminations, the इ is necessarily inserted).

Rt. हृ U. (st. b. जहार् or जहर्, w. b. जहृ).

Parasmaipada.			Atmanepada.		
Singular.	*Dual.*	*Plural.*	*Singular.*	*Dual.*	*Plural.*
जहार or जहर	जह्रिव	जह्रिम	जह्रे	जह्रिवहे	जह्रिमहे
जहर्थ	जह्रथुः	जह्र	जह्रिषे	जह्राथे	जह्रिध्वे-ढ्वे
जहार	जह्रतुः	जह्रुः	जह्रे	जह्राते	जह्रिरे

Rt. नी U. (st. b. निनै or निने, w. b. निनी).

P.	निनाय or निनय	निन्यिव	निन्यिम
	निनयिथ or निनेथ	निन्यथुः	निन्य
	निनाय	निन्यतुः	निन्युः
A.	निन्ये	निन्यिवहे	निन्यिमहे
	निन्यिषे	निन्याथे	निन्यिध्वे-ढ्वे
	निन्ये	निन्याते	निन्यिरे

Rt. ज्ञा U. (base जज्ञा, the final आ of this being dropped before all weak terminations and before इथ).

जज्ञौ	जज्ञिव	जज्ञिम	जज्ञे	जज्ञिवहे	जज्ञिमहे
जज्ञिथ or जज्ञाथ	जज्ञथुः	जज्ञ	जज्ञिषे	जज्ञाथे	जज्ञिध्वे
जज्ञौ	जज्ञतुः	जज्ञुः	जज्ञे	जज्ञाते	जज्ञिरे

The roots दा, धा, पा, गै, धे, सो and others ending in आ, ए, ऐ and ओ are conjugated like ज्ञा. See *Note* under Art. 3.

मृ P. See Art. 92, page 171 of the S. S. Course. (st. b. ममार् or ममर्, w. b. ममृ) ममार or ममर, मम्रिव, मम्रिम । ममर्थ, मम्रथुः, मम्र । ममार, मम्रतुः, मम्रुः ।

दंश् P. ददंश, ददंशिव, ददंशिम । ददंशिथ or ददंष्ठ (S. R. 16, 25), ददंशथुः, ददंश । ददंश, इ० ।

बन्ध् P. बबन्ध, बबन्धिव, बबन्धिम । बबन्धिथ or बबन्द्ध (S. R. 26), बबन्धथुः, बबन्ध । बबन्ध, इ० ।

प्रच्छ् P. पप्रच्छ, पप्रच्छिव, पप्रच्छिम । पप्रच्छिथ or पप्रष्ठ (S. R. 16, 25), पप्रच्छथुः, पप्रच्छ । पप्रच्छ, इ० ।

भञ्ज् P, बभञ्ज, बभञ्जिव, बभञ्जिम । बभञ्जिथ or बभङ्क्थ, बभञ्जथुः, बभञ्ज । बभञ्ज, इ० ।

मस्ज् P. (base मज्ज्) ममज्ज, ममज्जिव, इ० । ममज्जिथ or ममङ्क्थ (Art. 91, *a* of the S. S. Course), ममज्जथुः, इ० ।

हु P. (st. b. जुहौ or जुहो, w. b. जुहु) जुहाव or जुहव, जुहुविव, इ० । जुहविथ or जुहोथ, जुहुवथुः, जुहुव । जुहाव, इ० ।

Exceptions. The roots अद्, ऋ and व्ये take इ before थ necessarily, while सृज् and दृश् take it optionally. Thus,

अद् P. आद, आदिव, आदिम । आदिथ, आदथुः, आद । आद, इ० ।

दृश् P. ददर्श, ददृशिव, ददृशिम । ददर्शिथ or दद्रष्ठ (Art. 91, *a* of the S. S. Course), ददृशथुः, ददृश । ददर्श, इ० ।

सृज् P. ससर्ज, ससृजिव, ससृजिम । ससर्जिथ or सस्रष्ठ (Art. 91, *a* of the S. S. Course), ससृजथुः, ससृज । ससर्ज, इ० ।

8. *Vet* roots (excepting स्वृ, सू and धू) take the intermediate इ optionally before all consonantal terminations. स्वृ and धू take इ before थ optionally, and necessarily before other consonantal terminations. Thus,

क्षम् P. चक्षाम or चक्षम, चक्षमिव or चक्षण्व, चक्षमिम or चक्षण्म (S.R. 29, 18)। चक्षमिथ or चक्षन्थ, चक्षमथुः, चक्षम । चक्षाम, इ० ।

" A. चक्षमे, चक्षमिवहे or चक्षण्वहे, चक्षमिमहे or चक्षण्महे । चक्षमिषे or चक्षंसे, चक्षमाथे, चक्षमिध्वे or चक्षन्ध्वे । चक्षमे, इ० ।

गुह् P. जुगूह (See Art. 91, *a* of the S. S. Course), जुगुहिव or जुगुह्व, जुगुहिम or जुगुह्म । जुगूहिथ or जुगोढ (S. R. 27. *b*, 26.), जुगुहथुः, जुगुह । जुगूह, जुगुहतुः, जुगुहुः ।

" A. जुगुहे, जुगुहिवहे or जुगुह्वहे, जुगुहिमहे or जुगुह्महे । जुगुहिषे or जुघुक्षे (S. R. 27. *a*, 28.), जुगुहाते, जुगुहिध्वे·ढ्वे or जुघूढ्वे (S. R. 27. *b*, 28. and 26. *b*)। जुगुहे, जुगुहाते, जुगुहिरे ।

(We give below some forms of *Vet* roots which illustrate the application of the various Sandhi Rules).

	2nd Per. singular.	*2nd Per. plural.*
Rt.	तृप् P. ततर्पिथ or ततर्प्थ or तत्रप्थ (Art. 91, *a* of the S. S. C.)	ततृप
"	मुह् P. मुमोहिथ or मुमोग्ध or मुमोढ (S. R. 27, Excep. *b*)	मुमुह
"	सिध् P. सिषेधिथ or सिषेद्ध	सिषिध
"	गाह् A. जगाहिषे or जघाक्षे	जगाहिध्वे·ढ्वे or जघाढ्वे

9. Bases ending in ऋ preceded by a conjunct consonant, and those ending in ॠ take Guṇa before weak terminations also. This rule is applicable to the roots जागृ and ऋ, and optionally to शॄ, दॄ and पॄ. Thus,

Rt. स्मृ P. सस्मार or सस्मर, सस्मरिव, सस्मरिम । सस्मर्थ, सस्मरथुः, सस्मर । सस्मार, इ० ।

जागृ P. जजागार or जजागर, जजागरिव, जजागरिम । जजागरिथ, जजागरथुः, जजागर । जजागार, इ० ।

ऋ P. आर, आरिव, इ० । आरिथ (Art. 7, Excep.), आरथुः, आर । आर, इ० ।

गॄ P. जगार or जगर, जगरिव, इ० । जगरिथ, जगरथुः, जगर । जगार, इ० ।

दॄ P. ददार or ददर, ददरिव or दद्रिव, ददरिम or दद्रिम । ददरिथ, ददरथुः or दद्रथुः, ददर or दद्र । ददार, इ० ।

10. The roots mentioned in Art. 107, *b* of the S. S. C.,* with the exception of व्रश्च् and प्रच्छ्, undergo *Samprasárana* before reduplication. Thus they form their weak bases; while the strong bases are formed from these by restoring the radical syllable to its original form, the reduplicative syllable continuing to be the same.

	Samprasárana	*w. base*	*st. base*
Rt. वच्	उच्	उउच्=ऊच्	उवच् or उवाच्
वद्	उद्	उउद्=ऊद्	उवद् or उवाद्
वस्	उष् (S.R.20)	उउष्=ऊष्	उवस् or उवास्
वह्	उह्	उउह्=ऊह्	उवह् or उवाह्
स्वप्	सुप्	सुषुप् (S.R.38)	सुष्वप् or सुष्वाप्
यज्	इज्	इइज्=ईज्	इयज् or इयाज्
ग्रह्	गृह्	जगृह्	जग्रह् or जग्राह्
ह्वे	हू	जुहू	जुहो or जुहौ
व्ये	वी	विवी	विव्यय् or विव्याय्

Rt. वच् U. उवाच or उवच, ऊचिव, ऊचिम । उवचिथ or उवक्थ, ऊचथुः, ऊच । उवाच, ऊचतुः, ऊचुः ॥ ऊचे, ऊचिवहे, ऊचिमहे । ऊचिषे, ऊचाथे, ऊचिध्वे । ऊचे, इ० ।

वह् U. उवाह or उवह, ऊहिव, ऊहिम । उवहिथ or उवोढ (S. R. 27, Excep. *d*), ऊहथुः, ऊह । उवाह, इ० ॥ ऊहे, ऊहिवहे, ऊहिमहे । ऊहिषे, ऊहाथे, ऊहिध्वे-ढ्वे । ऊहे, इ० ।

स्वप् P. सुष्वाप or सुष्वप, सुषुपिव, सुषुपिम । सुष्वपिथ or सुष्वप्थ, सुषुपथुः, सुषुप । सुष्वाप, इ० ।

ह्वे U. जुहाव or जुहव, जुहुविव, जुहुविम । जुहविथ or जुहोथ, जुहुवथुः, जुहुव । जुहाव, जुहुवतुः, जुहुवुः ॥ जुहुवे, जुहुविवहे, जुहुविमहे । जुहुविषे, जुहुवाथे, जुहुविध्वे-ढ्वे । जुहुवे, इ० ।

---

* वच्, वद्, वस्, वह्, वप्, स्वप्, यज्, व्यध्, ग्रह्, (व्रश्च्, प्रच्छ्), वे, व्ये, ह्वे and श्वि.

11. Roots beginning with अ followed by a conjunct consonant, and those beginning with ऋ are not reduplicated, but आन् is prefixed to them in forming the base. This applies to the root अश् (5. A.) also. *E. g.*

Rt. अञ्ज् P. *Vet* (base आनञ्ज्) आनञ्ज, आनञ्जिव or आनञ्ज्व, आनञ्जिम or आनञ्ज्म । आनञ्जिथ or आनङ्क्थ, आनञ्जथुः, आनञ्ज । आनञ्ज इ० ।

ऋज् A (base आनृज्) आनृजे, आनृजिवहे, आनृजिमहे। आनृजिषे, इ०।

अश् A. *Vet* (base आनश्) आनशे, आनशिवहे or आनश्वहे, आनशिमहे or आनश्महे । आनशिषे or आनक्षे (S R. 16, 24. *a*), आनशाथे, आनशिध्वे or आनड्ढ्वे (S. R. 16, 24. *c*) । आनशे, आनशाते, इ० ।

12. Roots containing a prosodially short अ and beginning with a simple consonant not changeable in the reduplicative syllable (by Rule 3 of reduplication), substitute ए for the अ and at the same time drop their reduplicative syllable before *weak* terminations, and before थ when it is added with the intermediate इ. (This rule is not applicable to the roots शस्, दद् and those beginning with व). *E. g.*

Rt. तन् U. (st. b. ततान् or ततन् , w. b. तेन्) ततान or ततन, तेनिव, तेनिम । तेनिथ, तेनतुः, तेन । ततान, इ० ॥ तेने, तेनिवहे, तेनिमहे । तेनिषे, तेनाथे, तेनिध्वे । तेने, इ० ।

पच् P. (st. b. पपाच् or पपच् , w. b. पेच्) पपाच or पपच, पेचिव, पेचिम । पेचिथ or पपक्थ, पेचथुः, पेच । पपाच, इ० ।

नश् P. *Vet* (st. b. ननाश् or ननश् , w. b. नेश्) ननाश or ननश, नेशिव or नेश्व, नेशिम or नेश्म । नेशिथ or ननंष्ठ (Art. 91 of the S. S. C.), नेशथुः, नेश । ननाश, इ० ।

दह् P. (st. b. ददाह् or ददह्, w. b. देह्) ददाह or ददह, देहिव, देहिम । देहिथ or ददग्ध (S. R. 27. *b*, 26. *a*), देहथुः, देह । ददाह, इ० ।

नह् U. (st. b. ननाह् or ननह्, w. b. नेह्) ननाह or ननह, नेहिव, नेहिम । नेहिथ or ननद्ध (by S. R. 27, Excep. *c*), नेहथुः, नेह । ननाह, इ० ॥ नेहे, नेहिवहे, नेहिमहे, । नेहिषे, इ० ।

13. This change of the radical अ to ए is necessary also in the case of तॄ (changed to तर् by Art. 9), फल्, भज् and त्रप्. It is optional in the case of जॄ (changed to जर्), भ्रम्, त्रस्, फण्, राज्, भ्राज्, भ्लाश् and स्वन्. *E. g.*

Rt. तॄ P. ततार or ततर, तेरिव, तेरिम । तेरिथ, तेरथुः, तेर । ततार, इ० ।

भज् U. बभाज or बभज, भेजिव, भेजिम । भेजिथ or बभक्थ, भेजथुः, भेज । बभाज, इ० ॥ भेजे, भेजिवहे, भेजिमहे । भेजिषे, इ० ।

त्रप् A. *Vet* त्रेपे, त्रेपिवहे or त्रेप्वहे, त्रेपिमहे or त्रेप्महे । त्रेपिषे or त्रेप्से, त्रेपाथे, त्रेपिध्वे or त्रेब्ध्वे । त्रेपे, इ० ।

भ्रम् P. बभ्राम or बभ्रम, बभ्रमिव or भ्रेमिव, बभ्रमिम or भ्रेमिम । बभ्रमिथ or भ्रेमिथ, इ० ।

राज् A. रराजे or रेजे, रराजिवहे or रेजिवहे, रराजिमहे or रेजिमहे । रराजिषे or रेजिषे, इ० ।

14. *Irregularities* :—

(*a*) The root भू forms the base बभूव् throughout—बभूव, बभूविव, बभूविम । बभूविथ, इ० ।

(*b*) The root इ forms the st. b. इयै or इये, w. b. ईय्—इयाय or इयय, ईयिव, ईयिम । इययिथ or इयेथ, ईयथुः, ईय । इयाय, ईयतुः, ईयुः ।

(*c*) The root इ with अधि (A.) forms the base अधिजगा which is conjugated like ज्ञा A.—अधिजगे, अधिजगिवहे, अधिजगिमहे । अधिजगिषे, इ० ।

(*d*) The root जि forms the base जिगि, हि forms जिघि and चि forms चिचि or चिकि, and are regularly conjugated like नी.

Rt. जि P. जिगाय or जिगय, जिग्यिव, जिग्यिम । जिगयिथ or जिगेथ, जिग्यथुः, जिग्य । जिगाय, इ० ।

(*e*) The roots व्यथ् A., द्युत् A. and प्याय् A. form the bases विव्यथ्, दिद्युत् and पिपी respectively. Thus—विव्यथे, विव्यथिवहे, विव्यथिमहे। विव्यथिषे, इ०।

(*f*) The penultimate radical vowel of गम्, हन्, जन्, खन् and घस् is dropped before the weak terminations. The ह् of हन् is changed to घ् throughout. *E. g.*

Rt. गम् P. (st. b. जगाम् or जगम्, w. b. जग्म्) जगाम or जगम, जग्मिव, जग्मिम। जगमिथ or जगन्थ, जग्मथुः, जग्म। जगाम, इ०।

हन् P. (st. b. जघान् or जघन्, w. b. जघ्न्) जघान or जघन, जघ्निव, जघ्निम। जघनिथ or जघन्थ, जघ्नथुः, जघ्न। जघान, इ०।

जन् A. (base जज्न्=जज्ञ् S. R. 19) जज्ञे, जज्ञिवहे, जज्ञिमहे। जज्ञिषे, जज्ञाथे, जज्ञिध्वे। जज्ञे, इ०।

घस् P. (st. b. जघास् or जघस्, w. b. जक्ष् S. R. 20) जघास or जघस, जक्षिव, जक्षिम। जघसिथ, जक्षथुः, जक्ष। जघास, जक्षतुः, जक्षुः।

Note. The root घस् has no forms in the Perfect and the Benedictive. The forms given above are optional substitutes of अद् and therefore the 2nd Per. singular is जघसिथ only.

(*g*) The Perfect of श्वि is formed from the base शिश्वि or शुशु. Thus—शिश्वाय-शिश्वय or शुशाव-शुशव, शिश्वियिव or शुशुविव, इ०। शिश्वयिथ or शुशविथ, इ०।

(*h*) The root ऋच्छ् forms the base आनर्च्छ् throughout. Thus, आनर्च्छ, आनर्च्छिव, इ०।

(*i*) The root ली is changed to ला optionally before strong terminations. Thus—लिलाय-लिलय or ललौ, लिल्यिव, लिल्यिम। लिलयिथ-लिलेथ or ललिथ-ललाथ, लिल्यथुः, लिल्य। लिलाय or ललौ, लिल्यतुः, लिल्युः।

(*j*) The nasal of स्वञ्ज् A. is optionally dropped. Thus—सस्वञ्जे or सस्वजे, सस्वञ्जिवहे or सस्वजिवहे, इ०।

EXERCISE I.

पुरा किल कद्रूर्विनता चेति कश्यपस्य द्वे भार्ये बभूवतुः । कद्रूर्बहून्नागान् सुषुवे विनतायास्तु गरुत्मानरुणश्चेति द्वावेव पुत्रौ जज्ञाते । अतो नागाः काद्रवेया इति संज्ञां प्रापुः, गरुत्मांश्च वैनतेय इति । अथ कदाचित् कथाप्रसङ्गेन ते सपत्न्यौ मिथो विवादमारेभाते । श्यामा रवेरश्वा इति कद्रूः प्रोवाच, सितास्त इत्यपरा । एवं विवदमाने ते पणं बबन्धतुः । यस्या वचनं मिथ्या भवेत्तयाऽन्या दासीभावेनोपचर्येति । ततो जयार्थिनी कद्रूर्निजात्मजानाहूयाभिदधे । भो यद्यहं भवतां मान्या तद्रवेरश्वान् सर्वत आवृणुत येन ते श्यामलाः स्युरिति । ततस्तैस्तथाकृते कद्रूः श्यामीभूतान् रवेरश्वान् विनतायै दर्शितवती सा चैवं छद्मना जिता पणबंधेनावशा सपत्न्या गृहे दासीभावं प्रपेदे । ततो भ्रातृमुखेनेमं वृत्तान्तं गरुत्माञ् शुश्राव । दुःखितश्च त्वरितं कद्रूमभीयाय । तत्र तं नागा अभितः परिवव्रुर्दास्या अयं पुत्र इति चोपजहसुः । अश्रुत्वेव तेषां दुरुक्तानि संयम्य क्रोधं कद्रूं सविनयं प्रणम्य तार्क्ष्यो मातुर्दास्यान्मुक्तिं ययाचे । तदा काद्रवेयाः सुचिरं संचिन्त्यैवमूचुः । भो गरुत्मन् सुधामाहृत्य नः प्रयच्छ ततो मातरं मोचयिष्यसीति । तथेति तेभ्यः प्रतिश्रुत्य गरुत्मान् क्षीराब्धिं ययौ । तत्र तस्य गुणैर्भगवान् विष्णुः परं तुतोष तस्मै वरौ प्रददौ च । एकेन वरेण स सुधाकलशं लेभेऽपरेण सविषा अपि नागास्तस्य भक्ष्या बभूवुः । एवं संपादितार्थो निवृत्य गरुत्मान् कद्रूमुपाययौ । उवाच । भोः काद्रवेया इदममृतमानीतं दर्भसंस्तरे स्थापयामि । ममाम्बां मोचयित्वेदंसर्वैः पीयतामिति । तच्छ्रुत्वातीव हृष्टास्ते गरुत्मते मातरं प्रतिददुः, वेगेन च सुधाकलशमभिपेतुः । तस्मिन्नेव क्षणे शक्रो दर्भसंस्तरात् कलशमपजहार । तेन नागाः परं विषादं भेजुः । अमृतलवाकाङ्क्षया च संस्तीर्णान् दर्भाँल्लिलिहुः । ततः पाटितजिह्वास्ते द्विजिह्वतां जग्मुः । तान् मूढान् निहत्य गरुडोपि दिने दिने प्राणयात्रां चक्रे ॥

तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥ १ ॥
दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥ २ ॥
परेषु स्वेषु च क्षिप्तैरविज्ञातपरस्परैः ।
सोऽपसर्पैर्जजागार यथाकालं स्वपन्नपि ॥ ३ ॥
ऋत्विजः स तथानर्च दक्षिणाभिर्महाक्रतौ ।
यथा साधारणीभूतं नामास्य धनदस्य च ॥ ४ ॥
कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ।
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ ॥ ५ ॥
गगनादवतीर्णा सा यथावृद्धपुरःसरा ।
तोयान्तर्भास्करालीव रेजे मुनिपरम्परा ॥ ६ ॥
उत्तेरिथ समुद्रं त्वं मदर्थेऽरीञ्जिहिंसिथ ।
समर्थ चातिघो मां धिग्जीवनलघूकृताम् ॥ ७ ॥
ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ॥ ८ ॥
गाण्डीवी कनकशिलानिभं भुजाभ्या-
माजघ्ने विषमविलोचनस्य वक्षः ॥ ९ ॥
बहु जगद पुरस्तात्तस्य मत्ता किलाहं
चकर च किल चाटु प्रौढयोषिद्वदस्य ॥ १० ॥
जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ॥ ११ ॥
वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥१२॥
दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे ।
बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम् ॥१३
तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव ।
उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम ॥१४॥
संजग्माते तावपायानपेक्षौ सेनाम्भोधी धीरनादौ रयेण ।
पत्तिः पत्तिं वाहमेयाय वाजी नागं नागः स्यन्दनस्थो रथस्थम् ॥१५
उच्चिक्यिरे पुष्पफलं वनानि, सस्नुः, पितॄन् पिप्रियुरापगासु ।
आरेभुरित्वा पुलिनान्यशङ्कं छायां समाश्रित्य विशश्रमुश्च ॥१६॥

Vis'vámitra, the son of Gâdhi, was (भू) a prince of the Lunar race, the sovereign of Kânyakubja. He had a conflict (वि-ग्रह्) with the Brâhma*n*a sage Vasish*t*ha for the possession of Kâmadhenu. At the command of Vasish*t*ha the cow created (सृज्) hordes of Yavanas, and by their aid she vanquished (परा-जि) Vis'vámitra. The latter, convinced of the power of Bráhma*n*ahood, determined (निस्-चि) to raise himself up to that rank, and for this purpose practised (तप् Atm.) penance for thousands of years. The gods, who were always afraid of any austere penance practised on earth, sent down (प्र-हि) a nymph named Menaká to entice him to lead a worldly life. Vis'vámitra yielded (वशं या) for a time to the charms of the nymph, and he had by her a daughter named S'akuntalá. However, in the end, the persevering ascetic obtained mastery (अभि-भू) over his passions and by the power of his austerities he began (प्र-क्रम्) to create new stars in the heavens. The gods were again frightened (सं-त्रस्) at this, and he desisted (वि-रम्) from the creation of new worlds only when they made (पदं नी) him a royal sage.

Notes. पणं बन्ध्-To bet, to pledge oneself to a wager. उपचर्य *adj*.-Should be served. पणबन्ध *m*.-An agreement. प्रपद्-To be reduced to. विषादं भज्-To be sad or disappointed. प्राणयात्रां कृ-To live upon, to maintain oneself. (१) तौ-राजानं राज्ञीं च. (२) दुदोह गां स यज्ञाय &c.-He milched the earth *i. e.* taxed his dominions (only) to perform sacrifices ; and Indra milched the heaven *i. e.* caused rain to fall in order to produce corn. The Dat. is used to denote the purpose for which an action is done. सम्पद्विनिमयेन &c.-राजा यज्ञैरिन्द्रलोकमिन्द्रश्चोदकेन भूलोकं पुपोष. (३) जजागार-Kept himself awake *i. e.* cognizant of all that was passing in his and in foreign dominions. (४) साधार-

र्णीभूतम्–Became synonymous. (५) This is said of the Seven Sages (सप्तर्षय: Ursá Major) who were going to visit S'iva. तोयान्तर्भास्करालीं–The series of the sun's images reflected from water. (६) This is said by Sîtá when a false rumour of Ráma's death was communicated to her by the demons. अतिघोरां मां धिग्जीवन° &c.–Fie upon my wretched self so heartless and disgraced by my still continuing to live. (७) च-च have here the sense of " no sooner–than " " as soon–as." See note on page 223 of the S. S. Course. (८) कनकशिलानिभम्–For the compound see note on page 216 of the S. S. Course. विषमविलोचनः– विषमाणि(त्रीणि) विलोचनानि यस्य सः (शिवः). (९) This is said by a young lady referring to her behavour with her lover. चाटु कृ—To speak freely, familiarly or agreeably. (१०) अत्रस्तः–Without fear *i. e.* with courage. अनातुरः—Unfatigued, disinterested. (११) वर्णाश्रमाणां गुरवे- वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मचर्यादीनां च गुरुर्नियामकः *i. e.* The regulator of castes and the stages of religious life through which a (twice-born) man passes. वर्णिन्– ब्रह्मचारिन्. (१२) प्रदक्षिणार्चिः–प्रगता दक्षिणं प्रदक्षिणा, प्रदक्षिणार्चिर्यस्य With the flames turning to the right (of the sacrificer). शुभशंसि- शुभं शंसति सूचयतीति. (१३) आभिजनेन– अभिजनादागतेन Derived from the family of her father. (१४) अपायानपेक्षौ–Having no thought of flight (अपाय). (१५) The verb चि with उत् governs two Accusatives, the thing collected being the direct and that from which it is collected being the indirect object. The root रम् with वि, आ or परि is Parasmaipadin. *The Lunar race*– सोमवंशः. *For the possession*–अर्थे, हेतोः, प्राप्तये. *Convinced*– प्रतीतः, जातप्रत्ययः. *Rank*– पदवी. *To entice him to lead &c.*–सांसारिकेषु सुखेषु यथासौ मनो निदधीत तथामुं प्रलोभयेति. *Charms*– लीलाविलासाः, हावभावाः. *Persevering*–स्थिरधीः, स्थिरारम्भः.

LESSON II.

The Perfect (continued).

15. The Periphrastic Perfect is formed by adding आम् to the root and then appending to this base the forms of the Reduplicated Perfect of the auxiliary verbs कृ, भू and अस् ‘ to be ’. Roots, which are Parasmaipadin, take the Parasmai. forms of the auxiliary verbs, while Atmane. roots take the Atmane. forms of कृ only, and the Parasmai. forms of अस् and भू. *

16. In adding आम् to roots, primitive or derivative, the following rules should be observed—

(*a*) Roots of the 10th Conjugation and Causals retain अय before आम् ; thus, कथय-कथयाम् ; Caus. verb कारय—कारयाम्, &c.

(*b*) Of the primitive roots, उष् and जागृ gu*n*ate their vowels, while भी, ह्री, भृ and हु (all of the 3rd Conjugation) are changed to that form which they have before the strong terminations of the Special Tenses. Other roots remain unchanged before आम्. *E. g.*

Rt.	उष्	base	ओषाम्	Rt.	भी	base	बिभयाम्
"	जागृ	"	जागराम्	"	ह्री	"	जिह्रयाम्
"	विद्	"	विदाम्	"	भृ	"	बिभराम्
"	ईक्ष्	"	ईक्षाम्	"	हु	"	जुहवाम्

---

* The roots अस् ‘ to be ’ and ब्रू are not used in the General Tenses as independent verbs, the forms of भू and वच् being substituted for them. The root अस् when used as an auxiliary has the following forms in this Tense :—(P.) आस, आसिव, आसिम । आसिथ, आसथुः, आस । आस, आसतुः, आसुः ॥ (A.) आसे, आसिवहे, आसिमहे । आसिषे, आसाथे, आसिध्वे । आसे, आसाते, आसिरे ।

Rt. कथ् 10. P. and ईक्ष् 1. A.

कथयाञ्चकार-चकर	कथयाञ्चकृव	कथयाञ्चकृम
कथयाञ्चकर्थ	कथयाञ्चक्रथुः	कथयाञ्चक्र
कथयाञ्चकार	कथयाञ्चक्रतुः	कथयाञ्चक्रुः
ईक्षाञ्चक्रे	ईक्षाञ्चकृवहे	ईक्षाञ्चकृमहे
ईक्षाञ्चकृषे	ईक्षाञ्चक्राथे	ईक्षाञ्चकृढ्वे
ईक्षाञ्चक्रे	ईक्षाञ्चक्राते	ईक्षाञ्चक्रिरे

or

कथयाम्बभूव	कथयाम्बभूविव	कथयाम्बभूविम
कथयाम्बभूविथ	कथयाम्बभूवथुः	कथयाम्बभूव
कथयाम्बभूव	कथयाम्बभूवतुः	कथयाम्बभूवुः
ईक्षाम्बभूव	ईक्षाम्बभूविव	ईक्षाम्बभूविम
ईक्षाम्बभूविथ	ईक्षाम्बभूवथुः	ईक्षाम्बभूव
ईक्षाम्बभूव	ईक्षाम्बभूवतुः	ईक्षाम्बभूवुः

or

कथयामास	कथयामासिव	कथयामासिम
कथयामासिथ	कथयामासथुः	कथयामास
कथयामास	कथयामासतुः	कथयामासुः
ईक्षामास	ईक्षामासिव	ईक्षामासिम
ईक्षामासिथ	ईक्षामासथुः	ईक्षामास
ईक्षामास	ईक्षामासतुः	ईक्षामासुः

17. The Passive forms of the Reduplicated Perfect are obtained by applying to the bases of all roots the Atmanepada terminations. The Passive forms of the Periphrastic Perfect are similarly obtained by applying to the bases the Atmanepada forms of the Reduplicated Perfect of the roots कृ, भू and अस्.

Rt. हन् Act. जघान, जघ्नतुः, जघ्नुः । Pass. जघ्ने, जघ्नाते, जघ्निरे ।
धृ „ दधार, दध्रतुः, दध्रुः । „ दध्रे, दध्राते, दध्रिरे ।
कृत् Act. कीर्तयाञ्चकार, °चक्रतुः, °चक्रुः । Pass. कीर्तयाञ्चक्रे, °चक्राते, °चक्रिरे ।
„ कीर्तयाम्बभूव, °बभूवतुः, °बभूवुः । „ कीर्तयाम्बभूवे, °बभूवाते, °बभूविरे ।
„ कीर्तयामास, कीर्तयामासतुः, इ० । „ कीर्तयामासे, कीर्तयामासाते, इ० ।

18. The Perfect participles are formed by adding वस् in the Parasmaipada and आन in the Atmanepada to the weak base of the Perfect. When the weak base consists of one syllable only, वस् is added with the intermediate इ, and it may be added with or without the इ to the roots गम्, हन्, दृश्, विश् and विद् 'to obtain'. In the case of गम्, हन् and खन्, the penultimate अ is not dropped when वस् is added without the intermediate इ. *E. g.*

Rt. कृ U.	w. b. चक्र्		Perf. part.	चकृवस्, चक्राण
स्तु U.	„	तुष्टु	„	तुष्टुवस्, तुष्टुवान
भिद् U.	„	बिभिद्	„	बिभिद्वस्, बिभिदान
नी U.	„	निनी	„	निनीवस्, निन्यान
दा U.	„	दद्	„	ददिवस्, ददान
यज् U.	„	ईज्	„	ईजिवस्, ईजान
गम् P.	„	जग्म् or जगम्	„	जग्मिवस् or जगन्वस् (S. R. 29)
हन् P.	„	जघ्न् or जघन्	„	जघ्निवस् or जघन्वस्
दृश् P.	„	ददृश्	„	ददृशिवस् or ददृश्वस्
खन् P.	„	चखन्	„	चखन्वस्
क्रम् P.	„	चक्रम्	„	चक्रण्वस् (S. R. 29,18)
इ P.	„	ईय्	„	ईयिवस्
तन् U.	„	तेन्	„	तेनिवस्, तेनान
राज् A.	„	रेज् or रराज्	„	रेजान or रराजान
प्रच्छ् P.	„	पपृच्छ्	„	पपृच्छ्वस्
स्मृ P.	„	सस्मर्	„	सस्मर्वस्

19. Those roots* that drop their penultimate nasal in forming their Past participles, also drop them in forming their Perfect participles. Before adding वस् or आन, the base is formed from such roots as if there were no nasal in them. *E. g.*

Rt. अञ्ज्	P.	dropping nasal	अज्	w. b.	आज्	Perf. part.	आजिवस्
बन्ध्	P.	”	बध्	”	बेध्	”	बेधिवस्
भञ्ज्	P.	”	भज्	”	बभज्	”	बभञ्वस्

20. Roots ending in ॠ change the ॠ to इर् (and to उर् after labials and व्) by S. R. 30, *b*, and then they are reduplicated, and वस् or आन added to them. *E. g.*

Rt. तॄ	P.	changed to	तिर्	w. b.	तितिर्	Perf. part.	तितीर्वस् (S. R. [30, *c*)
पॄ	P.	”	पुर्	”	पुपुर्	”	पुपूर्वस्
वॄ	U.	”	वुर्	”	वुवुर्	”	वुवूर्वस् , वुवुराण

21. The Perfect participles ending in वस् are declined like विद्वस् having three bases, viz., *Anga* base ending in वांस्, *Pada* base ending in वत् and *Bha* base ending in उस् (changed to उष्). The last is identical with the 3rd Person plural of the Reduplicated Perfect of the root, with the *Visarga* replaced by स्, and in the case of roots mentioned in Art. 19 and 20, it is formed by adding the termination उस् to the same weak base which receives वस्. *E. g.*

---

* These are अञ्ज्, भञ्ज्, रञ्ज्, सञ्ज्, स्वञ्ज्, ग्रन्थ्, मन्थ्, स्कन्द्, स्यन्द्, इन्ध्, बन्ध्, स्तम्भ्, दंश्, भ्रंश्, ध्वंस्, शंस् and स्रंस्. (See Art. 107, 108 and 109 of the S. S. Course).

MASCULINE.

Rt.	*Perf. part.*	*Nom. sing.*	*Nom. pl.*	*Acc. pl.*	*Loc. sing.*	*Loc. pl.*
नी	निनीवस्	निनीवान्	निनीवांसः	निन्युषः	निन्युषि	निनीवत्सु
कृ	चकृवस्	चकृवान्	चकृवांसः	चक्रुषः	चक्रुषि	चकृवत्सु
श्रु	शुश्रुवस्	शुश्रुवान्	शुश्रुवांसः	शुश्रुवुषः	शुश्रुवुषि	शुश्रुवत्सु
क्रम्	चक्रन्वस्	चक्रन्वान्	चक्रन्वांसः	चक्रमुषः	चक्रमुषि	चक्रन्वत्सु
दा	ददिवस्	ददिवान्	ददिवांसः	ददुषः	ददुषि	ददिवत्सु
गम्	जग्मिवस् or जगन्वस्	जग्मिवान् or जगन्वान्	जग्मिवांसः or जगन्वांसः	जग्मुषः	जग्मुषि	जग्मिवत्सु or जगन्वत्सु
दृश्	ददृशिवस् or ददृश्वस्	ददृशिवान् or ददृश्वान्	ददृशिवांसः or ददृश्वांसः	ददृशुषः	ददृशुषि	ददृशिवत्सु or ददृश्वत्सु
सद्	सेदिवस्	सेदिवान्	सेदिवांसः	सेदुषः	सेदुषि	सेदिवत्सु
बन्ध्	बेधिवस्	बेधिवान्	बेधिवांसः	बेधुषः	बेधुषि	बेधिवत्सु
तॄ	तितीर्वस्	तितीर्वान्	तितीर्वांसः	तितिरुषः	तितिरुषि	तितीर्वत्सु

NEUTER.

Nom. Acc. निनीवत्, निन्युषी, निनीवांसि ।

The feminine base of these participles is formed by adding ई to the *Bha* base. *E.g.* **निन्युषी, चक्रुषी, शुश्रुवुषी, चक्रमुषी, ददुषी, सेदुषी, तितिरुषी,** &c. declined like **नदी**.

Note. Perfect participles should be translated in English by verbs in the Present Perfect or Pluperfect tense either in adjectival sentences or in adverbial sentences beginning with 'when'.

EXERCISE II.

निजात्मजानां दुर्योधनप्रभृतीनां पाण्डुपुत्राणां च पुनर्विग्रहो मा भवत्विति धृतराष्ट्रेण युधिष्ठिराय राज्यार्धं ददे । स च खाण्डवप्रस्थं प्रेषयामासे । ततस्ते पाण्डवास्तत्र गत्वा कृष्णपुरोगमाः ॥ मण्डयाश्चक्रिरे तद्वै पुरं स्वर्गवदुत्तमम् ॥ तत्र च पश्च प्रासादाः शिल्पिभिर्निर्ममिरे । तेषु महार्हाण्यासनान्युपकल्पयाम्बभूविरे । पौरकार्याणि कु-

र्णाः पाण्डवास्तान्यध्यासामासुः । अथैकदा नारदस्तत्र यदृच्छया संप्राप्त आसनादिदानेन युधिष्ठिरेण पूजयाञ्चक्रे । स सर्वान्पाण्डवानाशीर्भिर्मोदयाञ्चकार कथां चैकां श्रावयामास । पुरा सुन्दोपसुन्दनामानौ राक्षसौ ब्रह्माणं तपोभिः प्रसादयाम्बभूवतुः । वरं चैकं वरयाञ्चक्रतुः । त्रिषु लोकेषु यद्भूतं किंचित्स्थावरजङ्गमम् ॥ सर्वस्मान्नौ भयं न स्यादृतेऽन्योन्यं पितामह, इति ॥ एतं वरं लेभानौ तौ सर्वान् देवान्विजिग्याते । ऋषयोऽपि तेभ्यो बिभयामासुः । अखिलं जगच्च ताभ्यां व्यथयाञ्चक्रे । तदा देवर्षिगणाः परमेष्ठिनमुपेत्य सुन्दोपसुन्दयोः कर्म सर्वं तस्मै निवेदयाञ्चक्रुः । ततः पितामहेन तयोर्वधोपायं संचिन्त्य विश्वकर्माजुहुवे व्यादिदिशे च सृज्यतामेका दिव्या प्रमदेति। सा प्रयत्नेन महता निर्ममे विश्वकर्मणा ॥ त्रिषु लोकेषु नारीणां रूपेणाप्रतिमा बभौ ॥ तस्यास्तिलोत्तमेति नाम चक्रे । ततः पितामहस्तामुवाच । गच्छ सुन्दोपसुन्दाभ्यां कुरु भद्रे प्रलोभनम् ॥ तयोर्यथा विरोधः स्यादन्योन्येन तथा कुरु ॥ दृष्ट्वैव तां वरारोहां व्यथितौ तौ बभूवतुः ॥ उभौ हि कामसंमत्तौ प्रार्थयामासतुश्च ताम् ॥ नैषा तव ममैषेति ततस्तौ मन्युराविशत् ॥ तिलोत्तमाया हेतोस्तौ तदान्योन्यं निजघ्नतुः ॥

तौ दम्पती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ॥ १ ॥
रथस्य तस्यां पुरि दत्तचक्षुर्विद्वान्विदामास शनैर्न यातम् ॥ २ ॥
नितान्तगुर्वीमपि सोनुभावाद्धुरं धरित्र्या बिभरांबभूव ॥ ३ ॥
दिव्या मूर्त्तिर्व्योमगैरुत्पतन्ती वीक्षामासे विस्मितैश्चण्डिकायाः ॥ ४ ॥
शुष्माणि प्रणयनादिसंस्कृते तैर्हवींषि जुहवांबभूविरे ॥ ५ ॥
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ॥ ६ ॥
शरीरिणा जैत्रशरेण यत्र निःशङ्कमूषे मकरध्वजेन ॥ ७ ॥
बाणभिन्नहृदया निपेतुषी सा स्वकाननभुवं व्यकम्पयत् ॥ ८ ॥
तथेति कामं प्रतिशुश्रुवान् रघोर्यथागतं मातलिसारथिर्ययौ ॥ ९ ॥
स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ॥ १० ॥

आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ॥ ११ ॥
द्यौरुन्नतामेव दिशः प्रसेदुः स्फुटं विसस्रे सवितुर्मयूखैः ।
क्षयं गतायामिव यामवत्यां पुनः समीयाय दिनं दिनश्रीः ॥ १२ ॥
बलिर्बबन्धे जलधिर्ममन्थे जह्रेऽमृतं दैत्यकुलं विजिग्ये ।
कल्पान्तदुःस्था वसुधा तथोहे तेनैष भारोतिगुरुर्न तस्य ॥ १३ ॥
स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥ १४ ॥
वामनाश्रमपदं ततः परं पावनं श्रुतमृषेरुपेयिवान् ।
उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः ॥ १५ ॥

When Pradyumna was only six years old, he was taken away (अपहृ) by the demon S'ambara and cast (प्र-अस्) into the ocean. There he was swallowed (निगॄ) by a large fish but he died not. The fish was caught (ग्रह्) by fishermen and carried (नी) to S'ambara's palace. There it was being cut down by his wife Mâyâvatî, when a beautiful child was seen (दृश्) in its belly. He was concealed (निगुह्) and reared (वर्धय) carefully by Máyávatî at the instance of Nárada. When he attained youth, Mâyávatî was fascinated (मोहय) by the beauty of his person and fell in love (कम्) with him. She told (कथ्) him how he was cast by S'ambara into the sea and rescued by her from the belly of a fish. When he heard (शुश्रुवस्) this, he became greatly enraged, fought with S'ambara and killed (व्यापादय) him. At that time Nârada came there and informed (श्रावय) him that he was Káma himself. He was burnt down (निर्दह्) by S'iva but was afterwards revived (जीवय) by him at the request of the gods, when Párvatî, the daughter of Himâlaya was married (परिणी) by him.

NOTES. ऋते usually governs the Abl. but sometimes the Acc, also. (२) Construe तस्यां पुरि दत्तचक्षुर्विद्वान् (हरिः) रथस्य शनैर्यातं न विवेद. (३) धुरं धरित्र्याः—The yoke of the earth i. e. the responsibility of government. अनुभाव m.- superior power. (४) चण्डिका -The goddess Durgá. (५) प्रणयनम्-Depositing of the sacred fire on the altar with recitation of Vedic hymns. (६) कृष्णा=द्रौपदी. (७) यत्र- द्वारवत्याम्. शरीरिणा-The god of love is called अनङ्ग (the bodiless), but in Dváravatî he lived i. e. manifested himself in his proper form. (८) सा- निशाचरी ताडका (९) यथागतं- यथागतस्तथा. (११) आशंस्य n.- Blessing, what is worth hoping for. पुनरुक्तभूत adj.-Superfluous, (lit. becoming a repetition). अन्यत्- पुत्रातिरिक्तम्. (१२) This is said at the end of a battle when the darkness and tumult produced by missiles had ceased. (१३) This describes the exploits of Vishnu in some of his incarnations. कल्पान्तदुःस्था-The earth was losing its balance (and therefore sinking) at the end of the *Kalpa* i. e. the time of the Universal Deluge. (१४) आसनबन्धधीरः-Steady in sitting down i. e. sitting down steadily. आददाना is the form of the Present and the Perfect participle ; here it should be taken as the Perfect participle to correspond with निषेदुषी, स्थिता, &c. ताम् = वसिष्ठधेनुम्. भूपतिः=दिलीपः. (१५) Vámana was one of the incarnations of Vishnu, which preceded his incarnation as Ráma, श्रुतमृषेः-Of which he had heard from the sage Vis'vámitra. प्रथमजन्मचेष्टितानि-The acts of his previous birth as Vámana. उन्मनाः—Feeling a pleasurable excitement. *Six years old*- षड्वर्षः, षड्वर्षदेशीयः. *Fishermen*-धीवराः. *Carefully*-यत्नतः. *At the instance of Nárada*- नारदस्यानुशासनेन, उपदेशेन. *When he attained youth*-यौवनपदवीं प्राप or आरुरोह.

LESSON III.

NUMERALS.

22. The numerals from 1 to 19 have already been given and their declension and use treated in the F. S. Course, Lesson XXII. The numerals denoting 'tens' are :—

विंशति *f.* 20	षष्टि *f.* 60
त्रिंशत् *f.* 30	सप्तति *f.* 70
चत्वारिंशत् *f.* 40	अशीति *f.* 80
पञ्चाशत् *f.* 50	नवति *f.* 90

By prefixing एक, द्वि, त्रि, चतुर्, पञ्च, षट्, सप्त, अष्ट and नव to these, intermediate numerals (from 21–29, 31–39, &c.) are formed. द्वि, त्रि and अष्ट are changed to द्वा, त्रयस् and अष्टा before विंशति and त्रिंशत् ; they remain unchanged before अशीति; before the rest the change is optional. Thus,

21 एकविंशति	36 षट्त्रिंशत्	64 चतुःषष्टि	92 द्विनवति or
22 द्वाविंशति	37 सप्तत्रिंशत्	66 षट्षष्टि	द्वानवति
23 त्रयोविंशति	38 अष्टात्रिंशत्	68 अष्टषष्टि	93 त्रिनवति or
24 चतुर्विंशति	39 नवत्रिंशत्	or अष्टाषष्टि	त्रयोनवति
25 पञ्चविंशति	42 द्विचत्वारिंशत् or	81 एकाशीति	94 चतुर्नवति
26 षड्विंशति	द्वाचत्वारिंशत्	82 द्व्यशीति	95 पञ्चनवति
27 सप्तविंशति	43 त्रिचत्वारिंशत् or	83 त्र्यशीति	96 षण्णवति
28 अष्टाविंशति	त्रयश्चत्वारिंशत्	84 चतुरशीति	97 सप्तनवति
29 नवविंशति	44 चतुश्चत्वारिंशत्	85 पञ्चाशीति	98 अष्टनवति or
31 एकत्रिंशत्	46 षट्चत्वारिंशत्	86 षडशीति	अष्टानवति
32 द्वात्रिंशत्	48 अष्टचत्वारिंशत्	87 सप्ताशीति	99 नवनवति
33 त्रयस्त्रिंशत्	or अष्टाचत्वारिंशत्	88 अष्टाशीति	
34 चतुस्त्रिंशत्	62 द्विषष्टि or द्वाषष्टि	89 नवाशीति	
35 पञ्चत्रिंशत्	63 त्रिषष्टि or त्रयःषष्टि	91 एकनवति	

The numerals 19, 29, 39, &c. may also be formed by prefixing एकोन or एकान्न or ऊन (=*minus* one) to the next numer-

al denoting a multiple of ten. Thus, नवविंशति or एकोनत्रिंशत् or एकान्नत्रिंशत् or ऊनत्रिंशत् = 29.

23. The numerals from विंशति to नवनवति are feminine nouns. Those of them that end in इ are declined like नीति *f.* and those ending in त् are declined like हरित् *f.* They are used in two ways :—(1) They may be in apposition to the noun of which they show the number agreeing with it only in case, *not* in gender and number. In this use they are always in the singular. Thus, विंशतिर्ब्राह्मणाः, त्रिंशता धेनुभिः, षष्ट्यां दिनेषु, अशीतिर्ग्रामेभ्यः, &c.

(2) They may be joined to the noun in the Genitive case and may then be used in the dual and plural. In this case they are collective nouns. Thus, ब्राह्मणानां विंशतिः-विंशती-विंशतयः, &c.

24. The numerals after 99 are likewise all nouns, whether the words signifying them are simple or compound. They are formed from शत *n.* 100, सहस्र *n.* 1000, अयुत *n.* 10000, &c. denoting the powers of ten. (See note to stanza 3, Lesson VI. page 215 of the S. S. Course).

By using द्वि, त्रि, चतुर्, &c. as numeral adjectives to शत, सहस्र, &c. or by prefixing them to शत, सहस्र, &c. so as to form a Dvigu compound, we get numerals denoting the multiples of शत, सहस्र, &c. *E. g.*

200 द्वे शते or द्विशतम्	5000 पञ्च सहस्राणि or पञ्चसहस्रम्
300 त्रीणि शतानि or त्रिशतम्	6000 षट् सहस्राणि or षट्सहस्रम्
400 चत्वारि शतानि or चतुः-शतम्	10000 दश सहस्राणि or दशसहस्रम् =अयुतम्

One mode of forming the numbers intermediate between 100 and 200, 200 and 300, &c. is to compound अधिक or उत्तर

(=more) with the numeral up to 99 and to use the compound as an adjective to शत, सहस्र, &c. ऊन (=minus) may similarly be compounded to get the same result. *E. g.*

120=विंशत्यधिकं or विंशत्युत्तरं शतम् or शतं च विंशतिश्च
195=पञ्चनवत्यधिकं or पञ्चनवत्युत्तरं शतम् or पञ्चोनं द्विशतम्
or शतं च पञ्चनवतिश्च

Another mode of forming some of these intermediate numerals is given in Art. 26.*

---

* In expressing large numbers, the digits are frequently mentioned in their order from right to left (अङ्कानां वामतो गतिः), zero (0) being called शून्य *n.* The digits themselves form a Dvandva componnd, which again is made a member of a Tatpurusha or a Bahuvrîhi compound by joining it with मित *pp. adj.* or संख्या *f.* *E. g.* द्विसप्तनवैकमिताः पुरुषाः=1972 persons; त्रिपञ्चसप्ताष्टशून्यचतुःसंख्याकानि दिनानि=408753 days.

The digits in such cases are sometimes represented by names of objects (as will be seen in the verse given below) which are popularly known to have the corresponding numbers. Thus,

1	expressed by	भूमि, इन्दु, रूप, &c.	or their synonyms.
2	„	भुज, पक्ष, नेत्र, &c.	„
3	„	पुर, लोक, गुण, अग्नि, &c.	„
4	„	वेद, समुद्र, युग, &c.	„
5	„	इषु, भूत, वायु, &c.	„
6	„	रस, ऋतु, अङ्ग, &c.	„
7	„	ऋषि, अश्व, पर्वत, &c.	„
8	„	वसु, दिग्गज, सर्प, &c.	„
9	„	निधि, रन्ध्र, ग्रह, &c.	„
0	„	अभ्र, पूर्ण , ख *n.*	„

रसगुणपूर्णमहीसमशकनृपसमयेऽभवन्ममोत्पत्तिः ।
रसगुणवर्षेण मया सिद्धान्तशिरोमणी रचितः ॥

25. The ordinals corresponding to the first ten numerals are :--

1st प्रथम or अग्रिम or आदिम (°मा *f.*)	5th पञ्चम (°मी *f.*)
	6th षष्ठ (°ष्ठी *f.*)
2nd द्वितीय (°या *f.*)	7th सप्तम (°मी *f.*)
3rd तृतीय (°या *f.*)	8th अष्टम (°मी *f.*)
4th चतुर्थ (°र्थी *f.*) or तुर्य or तुरीय (°या *f.*)	9th नवम (°मी *f.*)
	10th दशम (°मी *f.*)

NOTE. The Nom. singular of प्रथम (*m.*) is प्रथमे or °माः, and द्वितीय and तृतीय are declined like सर्व optionally in the Dat. Abl. Gen. and Loc. singulars.

The ordinals corresponding to the rest of the numerals are formed as follows :—

(*a*) By dropping the final न् of एकादशन् to नवदशन्.
" " ति of विंशति and its compounds.
" " त् of त्रिंशत्, चत्वारिंशत् and पञ्चाशत् and their compounds.
" " इ of the compounds only of षष्टि, सप्तति, अशीति and नवति.

The final अ of all these ordinals is changed to ई in the feminine.

(*b*) By adding तम (°मी *f.*) to all numerals except the first nineteen. The addition of तम to षष्टि, सप्तति, अशीति, नवति, शत, सहस्र, &c. is the only way of forming ordinals from them. ***E. g.***

15th पञ्चदश	74th चतुःसप्तत or चतुःसप्ततितम
20th विंश or विंशतितम	86th षडशीत or षडशीतितम
36th षट्त्रिंश or षट्त्रिंशत्तम	100th शततम only
41st एकचत्वारिंश or एकचत्वारिंशत्तम	1000th सहस्रतम only
50th पञ्चाश or पञ्चाशत्तम	111th एकादशाधिकशततम
60th षष्टितम only	211th एकादशाधिकद्विशततम

26. The cardinal numbers from '111' to '159,' '211' to '259,' &c. may be formed by using the shorter ordinals (given in Art. 25, *a*) from 11th to 59th as adjectives to शत, द्विशत, &c. *E. g.* 112=द्वादशं शतम्, 345=चतुश्चत्वारिंशं त्रिशतम्, &c. This rule applies to सहस्र also; thus, 1041=एकचत्वारिंशं सहस्रम्, &c.

27. Numerals compounded with गुण form adjectives denoting 'fold', 'times', &c. *E. g.* द्विगुण = two-fold or double, चतुर्गुण = four-fold or quadruple, अष्टगुण eight-fold, &c. They are compounded with भाग to denote a fraction, as त्रिभागः = तृतीयो भागः=$\frac{1}{3}$; षड्भागः=षष्ठो भागः =$\frac{1}{6}$; &c.

28. *Collective numerals.* The Collective numerals corresponding to the numbers from 2 to 10 are :—

द्वय or द्वितय or द्विक *n.*	A collection of	two
त्रय or त्रितय or त्रिक *n.*	,,	three
चतुष्टय or चतुष्क *n.*	,,	four
पञ्चतय or पञ्चक *n.* or पञ्चत् *f.*	,,	five
षट्क *n.*	,,	six
सप्तक *n.*	,,	seven
अष्टक *n.*	,,	eight
नवक *n.*	,,	nine
दशक *n.* or दशत् *f.*	,,	ten

29. *Numeral adverbs.* The adverbs of definite frequency are formed by applying कृत्वस् to all numerals except the first four, which have special forms corresponding to them. Thus,

सकृत् once	पञ्चकृत्वः five times
द्विः twice	षट्कृत्वः six times
त्रिः thrice	द्वादशकृत्वः twelve times
चतुः four times	शतकृत्वः hundred times

The suffix धा is added to numerals to form adverbs expressing kinds, ways or parts, &c. Thus, एकधा in one way; द्विधा or द्वेधा in two ways or 2 parts; त्रिधा or त्रेधा in three ways or 3 parts; चतुर्धा, पञ्चधा, षोढा or षड्धा, अष्टधा, &c.

The suffix शस् is added to numerals to express repetition. Thus,

एकशः one at a time or one by one.
द्विशः two at a time or in twos.
त्रिशः three at a time or in threes.

Also बहुशः much or many at a time.
अल्पशः little or few at a time.
सर्वशः All at once

EXERCISE IV.

पुरा प्रजापतेर्दक्षस्य दुहितरः षष्टिरासन्। स तासां त्रयोदश कश्यपाय ददौ, दश धर्माय,सप्तविंशतिमिन्दवे च। चतस्रोऽरिष्टनेमी प्रतिजग्राह। द्वे द्वे चेति षट् कृशाश्वोऽङ्गिरा बहुपुत्रश्च प्रतिजगृहुः। कश्यपस्य त्रयोदशसु भार्यास्वदितेर्द्वादशादित्याः समजायन्त, सुरभेरेकादश रुद्राश्च। दित्या द्वौ पुत्रौ जज्ञाते दनोश्च शतं पुत्रा बभूवुः। कद्र्वाः सहस्रं नागा जज्ञिरे, विनतायाश्च द्वावेव पुत्रौ बभूवतुः। सप्तविंशतिः सोमस्य पत्न्यो नक्षत्राख्यां जग्मुः। तासां चतुर्थ्यां रोहिण्यां स यथा बद्धभावस्तथान्यासु षड्विंशतौ नासीत्। दशानां धर्मस्यपत्नीनां द्वितीयस्या अष्टौ वसवः पुत्राः पञ्चम्या द्वादश भानवः षष्ठ्या एकोनपञ्चाशदनिला दशम्याश्च त्रयोदश विश्वेदेवाः समभवन्। अरिष्टनेमिनः षोडशापत्यानि जज्ञिरे। बहुपुत्रस्य चतस्रो विद्युतोऽजायन्त। कृशाश्वो देवर्षिस्त्रयस्त्रिंशतं पुत्रानजनयत्।

महाभूतानि पञ्चैव षष्ठं च मन उच्यते।
सप्तमी बुद्धिरित्याहुः क्षेत्रज्ञः पुनरष्टमः॥ १॥
देव्या शून्यस्य जगतो द्वादशः परिवत्सरः।
प्रनष्टमिव नामापि न च रामो न जीवति॥ २॥

द्विधा त्रिधा चतुर्धा च तमेकमपि शत्रवः ।
पश्यन्तः स्पर्धया सद्यः स्वयं पञ्चत्वमाययुः ॥ ३ ॥
ततः स भगवान् विप्रः समादिश्य नराधिपम् ।
सुष्वापैकेन पार्श्वेन दिवसानेकविंशतिम् ॥ ४ ॥
अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ॥ ५ ॥
पञ्चप्रसूतेरपि राज्ञ आसीत्प्रियो विशेषेण सुबाहुशत्रुः ।
वधूचतुष्केपि यथैव शान्ता प्रिया तनूजास्य तथैव सीता ॥६॥
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ॥७॥
दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम् ।
दशपूर्वरथं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः ॥ ८ ॥
इत्थं क्षितीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरंपरामिव ॥ ९ ॥
त्रिःसप्तकृत्वो जगतीपतीनां हन्ता गुरुर्यस्य स जामदग्न्यः ।
वीर्यावधूतः स्म तदा विवेद प्रकर्षमाधारवशं गुणानाम् ॥ १० ॥

Of the eighteen *Parvans* of Mahábhárata, the twelfth is the biggest. It contains three hundred and thirty-nine chapters, and fourteen thousand, seven hundred and thirty-two verses. The eighteenth is the shortest containing only five chapters, and two hundred and nine verses.

The Rigveda contains eight *Ashtakas* and each *Ashtaka* eight chapters. Thus there are sixty-four chapters in all. It is also divided into ten *Mandalas*. There are a little more than a thousand hymns, a little more than two thousand *Vargas* and a little more than ten thousand verses. At the beginning of the seventh *Mandala*, which is in the first chapter of the fifth *Ashtaka*, there are twenty-five verses addressed to *Agni*.

The year 1899th of the Christian Era corresponds to 1821st of S'âlivâhana's and 4347th of Yudhishthira's.

A Lunar year has twelve months and about 356 days. Every third year has thirteen months. Each month contains about 29½ days and each day twenty-four hours or sixty *ghatikâs*.

NOTES. *F. N.* रसगुणवर्षेण–In my thirty-sixth year. रसगुण have here the sense of an ordinal. (३) There is a pun here on the word पञ्चत्व which means 'to become five-fold' *i. e.* to be reduced to the five elements (पृथिवी, आपः, तेजः, वायुः and आकाशः) which means to suffer death. स्पर्धया &c. would therefore mean that owing to their rivalry they tried to become five-fold *i. e.* they suffered death. (६) सुबाहुशत्रुः=रामः. (८) दशरश्मिशत° – दश रश्मिशतानि यस्य सः=सहस्ररश्मिः सूर्यः. दशपूर्वरथः – दशपूर्वः (दशशब्दपूर्वः) रथः (रथशब्दः) (कर्म०)=दशरथः.(१०) सोपानपरम्परा –A series of steps. (११) Construe त्रिःसप्तकृत्वो जगतीपतीनां हन्ता गुरुः सः (प्रसिद्धः) जामदग्न्यो यस्य (भीष्मस्य) वीर्यावधूतः सन्, तदा (पराभवकाले) गुणानां प्रकर्षं (शौर्यादीनामतिशयं) आधारवशं (आश्रयाधीनं) विवेद स्म (स्म पादपूरणे), स्वविद्यायाः स्वशिष्ये भीष्मे स्वस्मादपि प्रकर्षाधानदर्शनात्. प्रकर्षमाधारवशं &c. The excellence to which good qualities reach depends upon the person who possesses them. *Biggest* – महत्तम. *Shortest* – लघिष्ठ. अष्टक *m.* – A book of the Rigveda. *Divided* – विभक्त. *A little more than a thousand* –ईषदधिकसहस्रम्. *Hymns* – सूक्तानि. *A verse of the Rigveda*— –ऋच् *f*, मन्त्र *m*. *Addressed to Agni*–अग्निदेवताकाः, अग्निमधिकृत्य प्रोक्ताः. *Christian Era*–ख्रिस्ताब्दः. *Correspond* – सम or समान *adj*. भू (with the Instr.). About 29½ —प्रायःसार्धा नवविंशतिः. घटिका — A division of time = Twenty-four minutes.

LESSON IV.

The Aorist.

30. The Aorist is the general past tense in Sanskrit. It denotes merely the completion of an action and is properly used to describe events which have taken place in recent time and within the knowledge of the speaker.

31. The augment अ is prefixed to a root in this tense as in the Imperfect. The forms of the Aorist without the augment अ may be used with the prohibitive particles मा and मा स्म to express the sense of the Imperative.

32. There are seven varieties of the Aorist due to differences in terminations to be applied. Most of the roots fall under one or another variety, although there are a few which belong to more than one variety. In the following treatment, the names of the varieties now in vogue are retained. It will be seen that the first, fourth, fifth and sixth varieties are analogous to one another and are developed by the successive addition of स्, इष् and सिष् to the terminations of the Imperfect of the *third* Conjugation. The second, third and seventh varieties have likewise a great resemblance to one another and are developed by the addition of स to the terminations of the Imperfect of the *first* Conjugation.

First Variety.

33. This variety is Parasmai. only. The terminations to be added are the same as those of the Imperfect of the third Conjugation, viz.

Singular.	*Dual.*	*Plural.*
अम्	व	म
स्	तम्	त
त्	ताम्	उस्

Note. Before उस्, the preceding आ is dropped.

34. The roots इ 'to go' (changed to गा), स्था, दा, धा, दो (= दा), पा 'to drink' and भू belong to this variety only. The roots घ्रा, शो (=शा) and सो (=सा) belong to this as well as to the sixth variety.

The root धे (=धा belongs to this, to the third and to the sixth variety. The roots दा, धा and स्था, when Atmanepadin, take the fourth variety in that *Pada*.

Rt. दा or दो			Rt. इ 'to go.'		
Singular.	*Dual.*	*Plural.*	*Singular.*	*Dual.*	*Plural.*
अदाम्	अदाव	अदाम	अगाम्	अगाव	अगाम
अदाः	अदातम्	अदात	अगाः	अगातम्	अगात
अदात्	अदाताम्	अदुः	अगात्	अगाताम्	अगुः

Rt. भू—अभूवम् (irr.), अभूव, अभूम । अभूः, अभूतम्, अभूत । अभूत्, अभूताम्, अभूवन् (irr.) ।

SECOND VARIETY.

35. This variety is Parasmai. only, except in the case of a few roots mentioned in Art. 36, *a* below, which are conjugated in this variety in both the *Padas*. The terminations to be applied are the same as those of the Imperfect of the first Conjugation, viz.

PARASMAIPADA.			ATMANEPADA.		
Singular.	*Dual.*	*Plural.*	*Singular.*	*Dual.*	*Plural.*
अम्	व	म	इ	वहि	महि
स् (:)	तम्	त	थाः	आथाम्	ध्वम्
त्	ताम्	अन्	त	आताम्	अन्त

Note. The final अ of the base is lengthened before व, म, वहि and महि, and dropped before अम्, अन् and अन्त. The initial आ of आथाम् and आताम् is changed to इ.

To form the base, अ is added to the root without any change of the radical vowel, but the penultimate nasal, if any, is dropped.

36. (*a*) The roots अस् 'to throw' (b. अस्थ्), वच् (b. वोच्), ख्या (b. ख्य्), and ऋ 3rd Conj. belong to this variety necessarily and even when Atmanepadin. The *Anit* roots लिप्, सिच् and ह्वे (b. ह्व) belong to this variety necessarily in the Parasmaipada and to this as well as to the fourth variety in the Atmanepada.

(*b*) Many Parasmai. roots of the fourth Conjugation ending in consonants belong to this variety only. The most important of these are—ऋध्, कुप्, कृश्, क्रुध्, क्लम्, क्लिद्, क्षम्, क्षुध्, क्षुभ्, गृध्, तम्, तुष्, तृप्, तृष्, दम्, दुष्, दृप्, द्रुह्, नश्, पुष्, प्लुष्, भ्रंश्, भ्रम्, मद्, मुह्, यस्, रुष्, लुट्, लुप्, लुभ्, शक्, शम्, शुध्, शुष्, श्रम्, श्लिष् 'to adhere,' सिध्, स्निह्, स्विद् and हृष्.

(*c*) The roots आप्, गम्, घस्, पत् (b. पप्), पिष्, मुच्, लुप्, विद् 'to obtain', विष्, शक्, शद्, शास् 'to rule' (b. शिष्), शिष्, सद्, सृ 3rd Conj. (b. सर्) and सृप् also belong to this variety necessarily. (In the Atmanepada गम्, मुच् and लुप् take the fourth, विद् takes the fourth and the fifth, while विष् takes the seventh variety).

37. (*a*) The roots क्षुद्, घुष्, च्युत्, छिद्, जॄ 4th Conj. (b. जर्), दृश् (b. दर्श्), निज् 3rd Conj., बुध् 'to know,' भिद्, युज् 7th Conj., रिच् 7th Conj., रुद्, रुध्, विच्, विज् 3rd Conj., शुच् 4th Conj., श्चुत्, श्च्युत्, श्वि (b. श्व्), स्कन्द्, स्तम्भ् and स्फुट् 1st Conj. 'to break' belong to this variety optionally in the Parasmaipada.

(*b*) The roots कॢप्, क्षुभ्, द्युत्, ध्वंस्, भ्रंश्, रुच्, वृत्, वृध्, शुभ्, श्वित्, स्यन्द्, स्रंस् and स्विद्, all of the first Conjugation

and Atmanepadin, belong to this variety optionally and are conjugated in the Parasmaipada.

Note. Of these roots, such as belong to this variety optionally and in the Parasmaipada only take the fourth or the fifth variety in the Atmanepada according as they are *Anit* or *Set*. श्लिष् 'to embrace' takes the seventh, and श्वि takes the third in addition to the fifth variety.

पुष् 4. P. and द्युत् 1. A.

Singular.	*Dual.*	*Plural.*	*Singular.*	*Dual.*	*Plural.*
अपुषम्	अपुषाव	अपुषाम	अद्युतम्	अद्युताव	अद्युताम
अपुषः	अपुषतम्	अपुषत	अद्युतः	अद्युततम्	अद्युतत
अपुषत्	अपुषताम्	अपुषन्	अद्युतत्	अद्युतताम्	अद्युतन्

Rt. वच् U. अवोचम्, अवोचाव, अवोचाम। अवोचः, अवोचतम्, अवोचत। अवोचत्, इ० ॥ अवोचे, अवोचावहि, अवोचामहि। अवोचथाः, अवोचेथाम्, अवोचध्वम्। अवोचत, अवोचेताम्, अवोचन्त।

पत् P. अपप्तम्, अपप्ताव, अपप्ताम। अपप्तः, अपप्ततम्, अपप्तत। अपप्तत्, इ०।

ऋ P. आरम्, आराव, आराम। आरः, आरतम्, आरत। आरत्, आरताम्, आरन्।

ऋ with सम् A. समारे, समारावहि, समारामहि। समारथाः, समारेथाम्, समारध्वम्। समारत, समारेताम्, समारन्त।

SIXTH VARIETY.

38. This variety is Parasmai. only. The terminations to be applied to roots in this variety are obtained by prefixing to the terminations of the first variety सी in the 2nd and 3rd Per. sing. and सिष् in others. The terminations, thus formed, are—

Singular.	*Dual.*	*Pluaal.*
सिषम्	सिष्व	सिष्म
सीः	सिष्टम्	सिष्ट
सीत्	सिष्टाम्	सिषुः

39. Roots ending in आ (as also those ending ए, ऐ and ओ which change their finals to आ) and not necessarily taking the first or the second variety, belong to this variety in the Parasmaipada. यम्, नम् and रम् when Parasmaipadin take this variety only. The root ली 9. P. (changed to ला optionally) and दरिद्रा may take this variety as ending in आ.

Note The roots यम्, नम् and रम् when Atmanepadin, and ली take the fourth, and दरिद्रा the fifth variety.

Rt. या 'to go' and यम् 'to restrain.'

Singular.	*Dual.*	*Plural.*
अयासिषम्	अयासिष्व	अयासिष्म
अयासीः	अयासिष्टम्	अयासिष्ट
अयासीत्	अयासिष्टाम्	अयासिषुः
अयंसिषम्	अयंसिष्व	अयंसिष्म
अयंसीः	अयंसिष्टम्	अयंसिष्ट
अयंसीत्	अयंसिष्टाम्	अयंसिषुः

Rt. रम् with वि P. व्यरंसिषम्, व्यरंसिष्व, व्यरंसिष्म । व्यरंसीः, व्यरंसिष्टम्, व्यरंसिष्ट । व्यरंसीत्, व्यरंसिष्टाम्, व्यरंसिषुः ।

SEVENTH VARIETY.

40. This variety is both Parasmai. and Atmane. The terminations to be applied in this variety are derived from those of the second by prefixing स to them. Thus,

PARASMAIPADA.			ATMANEPADA.		
Sing.	*Dual*	*Plural.*	*Singular.*	*Dual.*	*Plural.*
सम्	साव	साम	सि	सावहि (or वहि)	सामहि
सः	सतम्	सत	सथाः (or थाः)	साथाम्	सध्वम् (or ध्वम्)
सत्	सताम्	सन्	सत (or त)	साताम्	सन्त

Note. The Atmanepada terminations, enclosed in brackets, are applied optionally to लिह्, विह्, दुह् and गुह् only.

41. *Anit* roots ending in श्, ष् or ह् and having इ, उ or ऋ for their penultimate belong to this variety. They are – क्रुश् , दिश्, मृश् , रिश् , रुश्, लिश्, विश्, स्पृश्, कृष् , त्विष् , द्विष्, विष् Atm., श्लिष् ' to embrace,' दिह्, दुह्, मिह्, रुह् and लिह्. Of these मृश्, स्पृश् and कृष् take the fourth variety also. The root दृश् takes the second and the fourth variety, and the roots (पुष्, तुष्, दुष्, पिष्, शिष् , शुष्) which belong to the second variety do not take this variety. The *Vet* roots क्लिश् and गुह् take this variety and the fifth.

42. No change of the radical vowel takes place in this variety. The final श्, ष् or ह् of roots combine with the initial स of terminations into क्ष् by S. R. 16, 24 and 27. The initial ग् and द् of roots ending in ह् are changed to घ् and ध् by S. R. 28.

Rt. विश् P. and विश् with नि A.

PARASMAIPADA.

अविक्षम्	अविक्षाव	अविक्षाम
अविक्षः	अविक्षतम्	अविक्षत
अविक्षत्	अविक्षताम्	अविक्षन्

ATMANEPADA.

न्यविक्षि	न्यविक्षावहि	न्यविक्षामहि
न्यविक्षथाः	न्यविक्षाथाम्	न्यविक्षध्वम्
न्यविक्षत	न्यविक्षाताम्	न्यविक्षन्त

Rt. दुह् (P.) अधुक्षम्, अधुक्षाव, अधुक्षाम । अधुक्षः, अधुक्षतम्, अधुक्षत । अधुक्षत्, अधुक्षताम्, अधुक्षन् ।

(A.) अधुक्षि, अधुक्षावहि or अदुह्वहि, अधुक्षामहि । अधुक्षथाः or अदुग्धाः, अधुक्षाथाम्, अधुक्षध्वम् or अधुग्ध्वम् । अधुक्षत or अदुग्ध, अधुक्षाताम्, अधुक्षन्त ।

लिह् (A.) अलिक्षि, अलिक्षावहि or अलिह्वहि, अलिक्षामहि । अ-

लिक्षथाः or अलीढाः, अलिक्षाथाम्, अलिक्षध्वम् or अलीढ्वम्। अलिक्षत or अलीढ, अलिक्षाताम्, अलिक्षन्त।

गुह् (P.) अघुक्षम्, अघुक्षाव, अघुक्षाम । अघुक्षः, अघुक्षतम्, अघुक्षत। अघुक्षत्, इ०।

(A.) अघुक्षि, अघुक्षावहि or अगुह्वहि, अघुक्षामहि। अघुक्षथाः or अगूढाः, अघुक्षाथाम्, अघुक्षध्वम् or अघूढ्वम्। अघुक्षत or अगूढ, अघुक्षाताम्, अघुक्षन्त।

Note. See S R, 26. *b*, 27. *b*, and 28 for अदुग्धाः, अगूढाः, अधुग्ध्वम्, अघूढ्वम्, &c.

EXERCISE IV.

अथ गच्छता कालेन राज्ञा पुरूरवसा सहोर्वशी गन्धमादनं विहर्तुमगमत्। तत्र केनापि हेतुना सा राज्ञेऽकुपत्तं च परित्यज्य निरयासीत्। ततः सा गुरुशापसंमूढहृदया स्त्रीजनपरिहरणीयं कुमारवनं यदृच्छया प्राविक्षत्। तत्र सद्य एव तस्या रूपं काननोपान्तवर्तिलताभावेन पर्यणंसीत्। तस्य राज्ञोऽप्युर्वशीमन्विष्यतस्तस्मिन्कानने कतिपयान्यहान्यत्ययासिषुः। तया वियोगेन शोकविकलः स उन्मत्तोऽभूदितस्ततश्च कानने पर्यभ्रमत्। तथा परिभ्रमन्नेकदा स रक्ताशोकस्तबकसमरागं कंचिन्मणिमदर्शत्। अयं मणिः संगमनीयो नाम धार्यमाणोऽचिरात्प्रियजनेन तव संगममावहेदिति कश्चिन्मुनिस्तं समादिक्षत्। तं गृहीत्वा परिक्रामन्नसौ लतामेकां वने स्वप्रियानुकारिणीमालिङ्गितुं प्रावृतत्। स्पृष्टमात्रायास्तस्याः स्थान उर्वशी प्रादुरभूत्। तां दृष्ट्वा तस्य राज्ञोऽन्तरात्मा प्राहृषत्प्रियाविरहज उन्मादश्च व्यनशत्।

स पृष्टः सर्वतो वार्तमाख्यद्राज्ञे न सन्ततिम्॥ १॥

अत्र स्थिता तृणमदाद्बहुशो यदेभ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म॥ २॥

आतिथ्यमनिवारितातिथिः कर्तुमाश्रमगुरुः स नाश्रमत्॥ ३॥

अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य सन्ततेः॥४॥

अनंसीच्चरणौ तस्य मन्दिरादिन्द्रजिद्व्रजन् ।
गते तस्मिन्नुपारंसीत्संरम्भाद्रक्षसां पतिः ॥ ५ ॥
निजकेतुशिरःश्रितः सुपर्णादुदपतन्नयुतानि पक्षिराजाम् ॥ ६ ॥
मौलैः सार्धं स्थविरसचिवैर्हैमसिंहासनस्था
राज्ञी राज्यं विधिवदशिषद्भर्तुरव्याहताज्ञा ॥ ७ ॥
समिताविति विक्रमानमृष्यन्गतभीराह्वत चेदिराण्मुरारिम् ॥८॥
सा सीतामङ्कमारोप्य भर्तृप्रणिहितेक्षणाम् ।
मा मेति व्याहरत्येव तस्मिन्पातालमभ्यगात् ॥ ९ ॥
हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम् ॥१०॥
प्राज्यमाज्यमसकृद्वषट्कृतं निर्मलीमसमलीढ पावकः ॥ ११ ॥
वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्समक्षम् ।
मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य ॥१२॥
पुरं निषादाधिपतेरिदं तद्यस्मिन्मया मौलिमणिं विहाय ।
जटासु बद्धास्वरुदत्सुमन्त्रः कैकेयि कामाः फलितास्तवेति ॥ १३ ॥
स काञ्चने यत्र मुनेरनुज्ञया नवाम्बुदश्यामवपुर्न्यविक्षत ।
जिगाय जम्बूजनितश्रियः श्रियं सुमेरुशृङ्गस्य तदा तदासनम् ॥ १४॥

Once upon a time the prince went out (इ) hunting and was carried away to a great distance in the pursuit of an antelope. While he was alone in the wood, the day came to an end (अति-या) and the night set in (प्र-वृत्). So he ascended (आ-रुह्) a tree to pass the night. Immediately afterwards a bear which had been followed by a lion came (प्र-आप्) there and got upon the same tree. It saw (दृश्) the prince frightened, but said (वच्) to him with a human voice "Fear not (भयमुपगम्), thou art my friend". The prince confiding in the bear's assurance went to sleep (सं-विश्), while the bear remained (स्था) awake. Then the lion below said (अभि-धा) to the bear "Throw me down this man and I shall

leave thee." Then the bear said (प्रति-वच्) "Villain, I will not cause the death of a friend." After some time the bear fell asleep (निद्रां गम्) while the prince kept awake. The lion said (अभि-धा) again "Man, throw me down the bear." When he heard that, the prince, anxious for his own safety, wanted to please the lion, and tried to throw down the bear, but fortunately it did not fall (पत्). The bear then uttered a curse (शापं दा) against the treacherous prince, owing to which, when he returned (नि-वृत्) to his palace in the morning, he went out of his mind (प्र-मुह्). When the king knew (ज्ञा) this, he became very sad (वि-सद्), called (आ-ह्वे) his ministers and told (आ-दिश्) them to find the cause of the prince's madness.

NOTES. गुरुशापसंमूढ°—Urvas'í did not remember the rule, by which women were not to enter the forest of Kártikeya, owing to the curse pronounced against her by her teacher (भरत). स्त्रीजनपरिहरणीयम् - To be avoided by women. कुमारवनम् - The forest of Kártikeya, the son of S'iva. He is called कुमार because of his having taken a vow to live a bachelor (ब्रह्मचारिन्.) पर्यणंसीत् - The root नी with परि means "to be changed to". स्पृष्टमात्रायास्तस्याः स्थाने &c. No sooner was it touched than Urvas'í appeared in its place. (३) आश्रमगुरुः - See note on verse (11) of Lesson I. (४) मा निधाः पदं पङ्क्त्याम् &c. -Do not place your foot in the (dangerous) position of the sons of Sagara, *i. e.* do not tread in their footsteps or follow their example. King Sagara was performing a horse-sacrifice (अश्वमेध) for the hundredth time hoping thereby to occupy the place of Indra in heaven. Indra in fear stole away the sacrificial horse, carried it off to Pátála (nether regions) and tied it in the hermitage of Kapila. The 60,000 sons of Sagara went to Pátála and accused the sage of having stolen the

horse. The sage in consequence reduced them to ashes by his curse. (५) उपारंसीत्-The root रम् with उप is both Parasmai. and Atmane. (६) निजकेतुशिरःश्रितः—°शिरः श्रयतीति निजकेतुशिरःश्रित् तस्मात् (See Art. 84 (1) page 155 of the S. S. Course). The eagle (सुपर्ण) marked the flag-staff (*i. e.* stood on its top) of the chariot of Vishnu or Krishna. पक्षिराज् *m.* - An eagle. (८) चेदिराट्- चेदिषु राजत इति· आह्वत - The root ह्वे with आ in the sense of 'to challenge' is Atmane. विक्रमान्= मुरारेः पराक्रमान्. (९) सा - पृथ्वी (the mother of Sîtá). तस्मिन् भर्तरि (रामे). (११) The adverb असकृत् refers to अलीढ· वषट्कृतम्–Poured into the fire after uttering वषट् (१२) This is said by Sîtá whom king Ráma abandoned owing to unfavourable rumours prevailing among the people. (१३) मौलिमणिः- The crest-jewel worn as the sign of royalty. सुमन्त्रः—The charioteer of Das'aratha, who took Ráma to the forest when Das'aratha banished him at the instigation of his favourite wife Kaikeyî (१४) यत्र- यस्मिन्नासने न्यविक्षत- The root विश् with नि is always Atmane. जम्बूजनितश्रियः- जम्बूभिः (नीलफलवद्भिस्तरुभिः) जनिता श्रीर्यस्य तत् (*n.*) तथोक्तस्य सुमेरुशृङ्गस्य हेमाद्रेः शिखरस्य. The compound adjective जम्बूजनितश्रि is declined like सुधि *n.* (See page 52 of the S. S. Course) and takes optionally the Masculine terminations in the Dat. Abl. Gen. and Loc. singular and the Gen. and Loc. dual (See the declension of शुचि *n.* on page 40 of the F. S. Course). जिगाय &c.- Surpassed the splendour of the summit of Meru which derives its beauty from the *jambú* trees. *Confiding in the bear's assurance* - ऋक्षस्य वचसि विश्वसन्. *Villain* - पाप *adj.* *Awake*-प्रबुद्धः, अवनिद्रः. *Anxious for his own safety*- आत्मत्राणपरायणः. *Wanted to please* - प्रसादयितुकामः, आराधयितुमनाः. *To throw down* - अधः प्रक्षेप्तुम्. *Fortunately* - दैवबलात्, भाग्यवशात्. *Treacherous* - मित्रद्रुह्, मित्रघातिन्. *Became very sad*- भृशं व्यषदत्. (See Art. 58 of the F. S. Course). *To find the cause &c.*-उन्मादकारणं परिज्ञायतामिति,-विनिश्चीयतामिति.

LESSON V.

The Aorist (continued).

Fourth Variety.

43. This variety and the fifth are the most general and important varieties. The terminations of the fourth variety are obtained by prefixing स् to the Parasmaipada and the Atmanepada terminations of the Imperfect of the third Conjugation, (except in the 2nd and the 3rd Per. singular Parasmaipada, where the terminations are सीः and सीत् respectively.) They are :—

Parasmaipada			Atmanepada		
Sing.	*Dual.*	*Plural.*	*Sing.*	*Dual.*	*Plural.*
सम्	स्व	स्म	सि	स्वहि	स्महि
सीः	(स्तम्)	(स्त)	(स्थाः)	साथाम्	ध्वम् (S.R.35)
सीत्	(स्ताम्)	सुः	(स्त)	साताम्	सत

Note. The terminations given in brackets, viz. स्तम्, स्त, स्ताम्, स्थाः and स्त drop their initial स् when applied to bases ending in short vowels, or consonants excepting nasals and र्. The termination ध्वम् is changed to ढ्वम् by S. R. 40.

44. *Anit* roots which are not restricted to other varieties take this variety. Such *Anit* roots as are *Ubhayapadin* and are restricted to some other variety in the Parasmaipada only, take this variety in the Atmanepada. *Vet* roots take this variety optionally under the same conditions as given above.

Exceptions. स्तु, सु and हन् (all *Anit*) do not take this variety in the Parasmaipada. The *Vet* roots अञ्ज् and धू (Parasmai.) do not take this variety. Roots ending in ऋ, preceded by a conjunct consonant, take this variety necessarily in the Parasmaipada and optionally in the Atmanepada.

Lastly *Set* roots ending in ॠ and the root वृ take this variety optionally in the Atmanepada.

45. Before the Parasmai. terminations the vowel of the root takes *Vriddhi.* In the case of मस्ज् a nasal is added after *Vriddhi.* In the case of सृज् and दृश्, रा is substituted for आर्, and this substitution is optional in the case of तृप्, दृप्, मृश्, स्पृश् and कृष् when they take this variety.

Before the Atmane. terminations, final इ, ई and उ, ऊ are gu*n*ated, and all other radical vowels remain unchanged, (ॠ being liable to be changed to ईर् and ऊर् by S. R. 30).

Final consonants of roots combine with the initial consonants of terminations according to the general rules of Internal *Sandhi* given before.

Rt. कृष्, भज् and भिद् (all *U.*)

PARASMAIPADA.			ATMANEPADA.		
Sing.	*Dual.*	*Plural.*	*Sing.*	*Dual.*	*Plural.*
अकार्षम्	अकार्ष्व	अकार्ष्म	अकृषि	अकृष्वहि	अकृष्महि
अकार्षीः	अकार्ष्टम्	अकार्ष्ट	अकृथाः	अकृषाथाम्	अकृड्ढ्वम्
अकार्षीत्	अकार्ष्टाम्	अकार्षुः	अकृत	अकृषाताम्	अकृषत
अभाक्षम्	अभाक्ष्व	अभाक्ष्म	अभक्षि	अभक्ष्वहि	अभक्ष्महि
अभाक्षीः	अभाक्तम्	अभाक्त	अभक्थाः	अभक्षाथाम्	अभग्ध्वम्
अभाक्षीत्	अभाक्ताम्	अभाक्षुः	अभक्त	अभक्षाताम्	अभक्षत
अभैत्सम्	अभैत्स्व	अभैत्स्म	अभित्सि	अभित्स्वहि	अभित्स्महि
अभैत्सीः	अभैत्तम्	अभैत्त	अभित्थाः	अभित्साथाम्	अभिद्ध्वम्
अभैत्सीत्	अभैत्ताम्	अभैत्सुः	अभित्त	अभित्साताम्	अभित्सत

Rt. श्रु P. अश्रौषम्, अश्रौष्व, अश्रौष्म । अश्रौषीः, अश्रौष्टम्, अश्रौष्ट ।
अश्रौषीत्, अश्रौष्टाम्, अश्रौषुः ।

Rt. नी P. अनैषम्. अनैष्व, अनैष्म। अनैषीः, अनैष्टम्, अनैष्ट। अनैषीत्, अनैष्टाम्, अनैषुः।

" A. अनेषि, अनेष्वहि, अनेष्महि। अनेष्ठाः, अनेषाथाम्, अनेढ्वम्। अनेष्ट, अनेषाताम्, इ०।

ज्ञा A. अज्ञासि, अज्ञास्वहि, अज्ञास्महि। अज्ञास्थाः, अज्ञासाथाम्, अज्ञाध्वम्। अज्ञास्त, इ०।

स्तु A. अस्तोषि, अस्तोष्वहि, अस्तोष्महि। अस्तोष्ठाः, अस्तोषाथाम्, अस्तोढ्वम्। अस्तोष्ट, इ०।

स्तॄ A. अस्तीर्षि, अस्तीर्ष्वहि, अस्तीर्ष्महि। अस्तीर्ष्ठाः, अस्तीर्षाथाम्, अस्तीर्ढ्वम्। अस्तीर्ष्ट, इ०।

वॄ A. अवूर्षि, अवूर्ष्वहि, अवूर्ष्महि,। अवूर्ष्ठाः, अवूर्षाथाम्, अवूर्ढ्वम्। अवूर्ष्ट, अवूर्षाताम्, इ०।

मस्ज् P. अमाङ्क्षम्. अमाङ्क्ष्व, अमाङ्क्ष्म। अमाङ्क्षीः, अमाङ्क्तम्। अमाङ्क्त। अमाङ्क्षीत्, अमाङ्क्ताम्, अमाङ्क्षुः।

यज् P. अयाक्षम्, अयाक्ष्व, अयाक्ष्म। अयाक्षीः, अयाष्टम्, अयाष्ट। अयाक्षीत्, अयाष्टाम्, इ०।

" A. अयक्षि, अयक्ष्वहि, अयक्ष्महि। अयष्ठाः, अयक्षाथाम्, अयड्ढ्वम्। अयष्ट, अयक्षाताम्, इ०।

पद् A. अपत्सि, अपत्स्वहि, अपत्स्महि। अपत्थाः, अपत्साथाम्, अपद्ध्वम्। अपादि (irr.), अपत्साताम्, अपत्सत।

बन्ध् P. अभान्त्सम्, अभान्त्स्व, अभान्त्स्म। अभान्त्सीः, अबान्द्धम्, अबान्द्ध। अभान्त्सीत्, अबान्द्धाम्, अभान्त्सुः।

बुध् 4. A. अभुत्सि, अभुत्स्वहि, अभुत्स्महि। अबुद्धाः, अभुत्साथाम्, अभुद्ध्वम्। अबोधि (irr.) or अबुद्ध, अभुत्साताम्, अभुत्सत।

दह् P. अधाक्षम्, अधाक्ष्व, अधाक्ष्म। अधाक्षीः, अदाग्धम्, अदाग्ध। अधाक्षीत्, अदाग्धाम्, इ०।

वह् P. अवाक्षम्, अवाक्ष्व, अवाक्ष्म। अवाक्षीः, अवोढम्, अवोढ। अवाक्षीत्, अवोढाम्, अवाक्षुः।

", A. अवक्षि, अवक्ष्वहि, अवक्ष्महि। अवोढाः, अवक्षाथाम्, अवोढ्वम्। अवोढ. अवक्षाताम्, अवक्षत।

Rt. नह् P. अनात्सम्, अनात्स्व, अनात्स्म। अनात्सीः, अनाद्धम्, अनाद्ध। अनात्सीत्, अनाद्धाम्, अनात्सुः।

,, A. अनत्सि, अनत्स्वहि, अनत्स्महि। अनद्धाः, अनत्साथाम्, अनद्ध्वम्। अनद्ध, अनत्साताम्, अनत्सत।

गाह् A. अघाक्षि, अघाक्ष्वहि, इ०। अगाढाः, अघाक्षाथाम् अघाढ्वम्। अगाढ, अघाक्षाताम्, इ०।

मन् 4. A. अमंसि, अमंस्वहि, इ०। अमंस्थाः, अमंसाथाम्, अमन्ध्वम्। अमंस्त, अमंसाताम्, इ०।

रम् A. अरंसि, अरंस्वहि, इ०। अरंस्थाः, अरंसाथाम्, अरन्ध्वम्। अरंस्त, अरंसाताम्, इ०।

दंश् P. अदाङ्क्षम्, अदाङ्क्ष्व, इ०। अदाङ्क्षीः, अदांष्टम्, अदांष्ट। अदाङ्क्षीत्, अदांष्टाम्, अदाङ्क्षुः।

दृश् P. अद्राक्षम्, अद्राक्ष्व, इ०। अद्राक्षीः, अद्राष्टम्, अद्राष्ट। अद्राक्षीत्, अद्राष्टाम्, अद्राक्षुः।

कृष् P. अक्राक्षम् or अकार्क्षम्, इ०। अक्राक्षीः or अकार्क्षीः, अक्राष्टम् or अकार्ष्टम्, अक्राष्ट or अकार्ष्ट। अक्राक्षीत् or अकार्क्षीत्, अक्राष्टाम् or अकार्ष्टाम्, अक्राक्षुः or अकार्क्षुः।

वस् P अवात्सम्, अवात्स्व, इ०। अवात्सीः, अवात्तम्, अवात्त। अवात्सीत्, अवात्ताम्, अवात्सुः।

मृज् P. अमार्क्षम्, अमार्क्ष्व, इ०। अमार्क्षीः, अमार्ष्टम्, अमार्ष्ट। अमार्क्षीत्, अमार्ष्टाम्, अमार्क्षुः।

प्रछ् P. अप्राक्षम्, अप्राक्ष्व, इ०। अप्राक्षीः, अप्राष्टम्, अप्राष्ट। अप्राक्षीत् अप्राष्टाम्, अप्राक्षुः।

रभ् A. अरप्सि, अरप्स्वहि, इ०। अरब्धाः, अरप्साथाम्, अरब्ध्वम्। अरब्ध, अरप्साताम्, अरप्सत।

46. *Irregularities.* (*a*) घस् is substituted for अद् in the Aorist (Act.), and takes the second variety.

(*b*) वध् is substituted for हन् necessarily in the Parasmaipada and optionally in the Atmanepada, and belongs to the fifth variety. The final न् of हन् is dropped before the Atmanepada terminations of the fourth variety. Thus,

Rt. हन् (Atm.) अहसि, अहस्वहि, इ०। अहथाः, अहसाथाम्, अहध्वम् अहत, अहसाथाम्, अहसत।

(*c*) गम् (Atm.) and यम् with उप (Atm.) drop their final म् optionally. (गम् P. takes the second and यम् P. the sixth variety). Thus,

Rt. गम् with सम् A. समगसि, समगस्वहि, इ०। समगथाः, समगसाथाम्, समगध्वम्। समगत, इ०। or समगंसि, समगंस्वहि, इ०। समगंस्थाः, समगंसाथाम्, समगन्ध्वम्। समगंस्त, इ०।
यम् with उप A. उपायसि or उपायंसि, इ०।

(*d*) The roots दा, धा and स्था change their final आ to इ, when they take this variety in the Atmanepada. Thus,

Rt. दा A. अदिषि, अदिष्वहि, इ०। अदिथाः, अदिषाथाम्, अदिढ्वम्। अदित, अदिषाताम्, अदिषत।

स्था with प्र A. प्रास्थिषि, इ०। प्रास्थिथाः, इ०। प्रास्थित, इ०।

(*e*) In the case of इ with अधि 'to study', गी may be optionally substituted for इ. (This takes place in the Conditional also). Thus, अध्यैषि, अध्यैष्वहि, इ०। अध्यैष्ठाः, अध्यैषाथाम्, अध्यैढ्वम्। अध्यैष्ट, इ०। or अध्यगीषि, अध्यगीष्वहि, इ०। अध्यगीष्ठाः, अध्यगीषाथाम्, अध्यगीढ्वम्। अध्यगीष्ट, इ०।

(*f*) The root ली is changed to ला optionally in the Aorist, the Futures, the Conditional, and the Benedictive (Atm.). When it is changed to ला it takes the sixth variety in the Parasmaipada, and the fourth in the Atmanepada. Otherwise it comes under the fourth in both the *Padas*. Thus,

Rt. ली A. अलेषि or अलासि, इ०। अलेष्ठाः or अलास्थाः, अलेषाथाम् or अलासाथाम्, अलेढ्वम् or अलाध्वम्। अलेष्ट or अलास्त, इ०।

FIFTH VARIETY.

47. Most of the *Set* roots belong to this variety, which differs from the fourth in taking the intermediate

इ before the terminations of the latter. The terminations, therefore, are—

	PARASMAIPADA.			ATMANEPADA.	
Sing.	*Dual.*	*Plural.*	*Sing.*	*Dual.*	*Plural.*
इषम्	इष्व	इष्म	इषि	इष्वहि	इष्महि
ईः	इष्टम्	इष्ट	इष्ठाः	इषाथाम्	इध्वम्
ईत्	इष्टाम्	इषुः	इष्ट	इषाताम्	इषत

Note. The termination इध्वम् is changed to इढ्वम् optionally according to S. R. 40. The intermediate इ prefixed to terminations in this variety is lengthened necessarily in the case of ग्रह्, and optionally in the case of वृ and roots ending in ॠ when Atmanepadin. (See Art. 91, *b* page 169 of the S. S. Course).

48. *Set* roots which are not restricted to other varieties take this variety. Those *Set* roots which belong to any of the other varieties in the Parasmaipada only take this variety in the Atmanepada. *Vet* roots take this variety optionally under the same conditions.

Exceptions. स्तु and सु take this variety in the Parasmaipada though *Anit.* अञ्ज् and धू (Parasmai.) take this variety only. Roots ending in ऋ preceded by a conjunct consonant, and those ending in ॠ and the root वृ belong to this variety optionally in the Atmanepada.

49. In forming the Parasmai. base, the final vowels take *Vriddhi*; but the finals of श्वि and जागृ take *Guna*. Penultimate short vowels, other than अ, take *Guna*. The penultimate अ of वद् and व्रज् and of roots ending in र् and ल् take *Vriddhi*, and that of कद्, लग्, हस्, क्षण्

and श्वस् as well as of roots ending in ह् and म् remains unchanged. The penultimate अ of other roots takes *Vriddhi* optionally. The final आ of दरिद्रा is dropped in this variety.

In the Atmanepada, final vowels (short or long) and penultimate prosodially short vowels take *Guna* ; other radical vowels remain unchanged.

Rt. विद् P., लू U. and मुद् A.

	Sing.	*Dual.*	*Plural.*
P.	अवेदिषम्	अवेदिष्व	अवेदिष्म
	अवेदीः	अवेदिष्टम्	अवेदिष्ट
	अवेदीत्	अवेदिष्टाम्	अवेदिषुः
	अलाविषम्	अलाविष्व	अलाविष्म
	अलावीः	अलाविष्टम्	अलाविष्ट
	अलावीत्	अलाविष्टाम्	अलाविषुः
A.	अमोदिषि	अमोदिष्वहि	अमोदिष्महि
	अमोदिष्ठाः	अमोदिषाथाम्	अमोदिध्वम्
	अमोदिष्ट	अमोदिषाताम्	अमोदिषत
	अलविषि	अलविष्वहि	अलविष्महि
	अलविष्ठाः	अलविषाथाम्	अलविध्वम्-ढ्वम्
	अलविष्ट	अलविषाताम्	अलविषत

Rt. श्वि P. अश्वयिषम्, अश्वयिष्व, इ० । अश्वयीः, अश्वयिष्टम्, इ० । अश्वयीत्, इ० ।

स्तु P. अस्ताविषम्, अस्ताविष्व, इ० । अस्तावीः, इ० । अस्तावीत्, अस्ताविष्टाम्, इ० ।

स्तृ P. अस्तारिषम्, अस्तारिष्व, इ० । अस्तारीः, इ० । अस्तारीत्, इ० ।
" A. अस्तरिषि or अस्तरीषि, अस्तरिष्वहि or अस्तरीष्वहि, इ० । अस्तरिष्ठाः or अस्तरीष्ठाः, इ० । अस्तरिष्ट or अस्तरीष्ट, इ० ।

वृ A. अवरिषि or अवरीषि, अवरिष्वहि or अवरीष्वहि, इ० ।

„ P. अवारिषम्, अवारिष्व, इ० ।

गुह् P. अगूहिषम् (See Art. 91, *a.* of the S. S. Course), अगूहिष्व, इ० ।

„ A. अगूहिषि, अगूहिष्वहि, इ० ।

तृप् P. अतर्पिषम्, अतर्पिष्व, इ० । अतर्पीः, अतर्पिष्टम्, इ० । अतर्पीत्, इ० ।

मृज् P. अमार्जिषम् (See Art. 91, *a* of the S. S. Course), अमार्जिष्व, इ० ।

ग्रह् P. अग्रहीषम्, अग्रहीष्व, इ० । अग्रहीः, अग्रहीष्टम्, इ० । अग्रहीत्, इ० ।

A. अग्रहीषि, अग्रहीष्वहि, इ० । अग्रहीष्ठाः, इ० । अग्रहीष्ट, इ० ।

जागृ P. अजागरिषम्, अजागरिष्व, इ० । अजागरीः, इ० । अजागरीत्, इ० ।

पठ् P. अपठिषम् or अपाठिषम्, अपठिष्व or अपाठिष्व, इ० ।

क्रम् P. अक्रमिषम्, अक्रमिष्व, इ० ।

वद् P. अवादिषम्, अवादिष्व, इ० ।

अञ्ज् P. आञ्जिषम्, आञ्जिष्व, इ० ।

दरिद्रा P. अदरिद्रिषम्, अदरिद्रिष्व, इ० ।

श्वस् P. अश्वसिषम्, अश्वसिष्व, इ० ।

वृत् (A.) अवर्तिषि, अवर्तिष्वहि, इ० ।

50. *Irregularities.*—(*a*) वध् which is substituted for हन् necessarily in the Parasmaipada and optionally in the Atmanepada, takes this variety and its penultimate अ remains unchanged. Thus,

Rt. हन् P. अवधिषम्, अवधिष्व, इ० ।

„ A. अवधिषि, अवधिष्वहि, इ० ।

(*b*) The roots दीप्, जन्, पूर्, ताय् and प्याय् (all Atmanepadin) take the termination इ optionally in the third Person singular. Thus,

Rt. दीप् A. अदीपिषि, इ० । अदीपिष्ठाः, इ० । अदीपि or अदीपिष्ट, इ० ।

„ जन् A. अजनिषि, इ० । अजनिष्ठाः, इ० । अजनि or अजनिष्ट, इ० ।

(*c*) In the case of तन् and other roots of the 8th Conjugation ending in न् or ण्, the Atmanepada terminations of the second and third Per. singular are optionally थाः and त for इष्ठाः and इष्ट. Before थाः and त, the final न् or ण् is dropped and in the case of सन् 'to obtain', the radical अ is lengthened when the final न् is dropped before थाः and त. Thus,

Rt. तन् P. अतनिषम् or अतानिषम्, इ० । अतनीः or अतानीः, इ० । अतनीत् or अतानीत्, इ० ।

" A. अतनिषि, इ० । अतनिष्ठाः or अतथाः, इ० । अतनिष्ट or अतत, अतनिषाताम्, इ० ।

सन् P. असनिषम् or असानिषम्, इ० ।

" A. असनिषि, असनिष्वहि, इ० । असनिष्ठाः or असाथाः, इ० । असनिष्ट or असात, इ० ।

(*d*) The root विज् 'to tremble' does not take Gu*n*a in forming the base in this variety as in the Futures, the Conditional and the Benedictive (Atm.). Also the roots कुट्, त्रुट्, स्फुर्, &c. of the 6th Conjugation do not take Gu*n*a. (See Art. 5 in Lesson I). Thus,

Rt. विज् P. अविजिषम्, इ० । A. अविजिषि, इ० ।
स्फुर् P. अस्फुरिषम्, इ० ।

EXERCISE V.

केनानुशस्ता यादवा अन्योन्यं निहत्य व्यनशन्निति जनमेजयो वैशम्पायनमप्राक्षीत् । स चैवमवादीत् । युधिष्ठिरस्य शासतः षट्त्रिंशे वर्षे कण्वनारदविश्वामित्रास्त्रयो मुनयः कृष्णदिदृक्षया द्वारकामभ्राजिषुः । यादवास्तान् रथ्यासु परिभ्रमतो दृष्ट्वा तदुपहासकृतमतयः कंचियुवानं स्त्रीमिव भूषयित्वा समीपमानैषुः । आभाषिषत च । इयं स्त्री पुत्र-

कामस्य बभ्रोरमिततेजसः। ऋषयः साधु जानीत किमियं जनयिष्यति॥ तद्विप्रलम्भधर्षितास्ते मुनयः परं क्रोधमभाक्षुः। अशाप्सुश्च यादवकुलविनाशकरं घोरं मुशलमस्य यूनो जायेतेति। अथ निवृत्ते मुनिजने कतिपयैरहोभिः कृष्णपुरोगमा यादवास्तीर्थयात्रायै प्रास्थिषत। प्रभासमेत्य च तत्रैव ते न्यवात्सुः। तेषां पानमदाविष्टानां महान् कलहः समजनि। अन्योन्यजिघांसया यद्यदायुधं तेऽग्रहीषुस्तत्तन्मुशलभावं प्रत्यपादि। तैर्मुशलैस्ते परस्परं प्रामाथिषुः। प्रमत्ता इव स्नेहं दयां बन्धुतां वा न किलाबोधिषत। अवधीत्पितरं पुत्रः पितापुत्रमघातयत्॥ पतङ्गानिव वह्निस्तानग्रसीदन्तकस्तदा॥ पतिविनाकृतानां युवतीनामाक्रोशं महान्तं कृष्णो यदाश्रौषीत्तदा विषण्णमना दारुकमादिक्षत्। भद्र कुरून् गत्वा सर्वमिमं वृत्तान्तं पाण्डवेभ्यो निवेदय क्षिप्रं चार्जुनमानयेति। स्वयमसौ सर्वाः स्त्रियो द्वारवतीं प्रत्यनैषीन्मास्मैता दस्यवोपहार्षुरिति। पुनः प्रभासं प्रतिनिवृत्य स बलरामं दिवं गतमद्राक्षीत्। आत्मनोपि संक्रमणकालोयमित्यवधार्य योगमास्थायेन्द्रियाणि न्यरौत्सीत्। यदृच्छया च लुब्धकशरविद्धः प्राणान् व्यस्राक्षीत्।

मूर्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषाताम्॥ १॥

अधिगतपरमार्थान् पण्डितान्मावमंस्था-
स्तृणमिव लघु लक्ष्मीर्नैव तान्संरुणद्धि॥ २॥

तत्र सूनृतगिरश्च सूरयः पुण्यमृग्यजुषमध्यगीषत॥ ३॥

ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः॥ ४॥

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥ ५॥

जाने विसृष्टां प्रणिधानतस्त्वां मिथ्यापवादक्षुभितेन भर्त्रा।
तन्मा व्यथिष्ठा विषयान्तरस्थं प्राप्तासि वैदेहि पितुर्निकेतम्॥ ६॥

यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम् ।
एतानि तानि बहुनिर्झरकन्दराणि
गोदावरीपरिसरस्य गिरेस्तटानि ॥ ७ ॥
सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनपारीत्सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च ॥ ८ ॥
अदः शरण्यं शरभङ्गनाम्नस्तपोवनं पावनमाहिताग्नेः ।
चिराय संतर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत् ॥ ९ ॥
स शुश्रुवान्मातरि भार्गवेण पितुर्नियोगात्प्रहृतं द्विषद्वत् ।
प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया ॥ १० ॥
नाव्यं पयः केचिदतारिषुर्भुजैः क्षिपद्भिरूर्मीनपरैरिवोर्मिभिः ॥ ११

There once lived (वस्) in a town a poor wood-cutter. He daily felled (छिद्) some tree, carried (नी) the wood to the town, sold (वि-क्री) it there, and thus supported (भृ) his family. One day he wandered about (वि-चर्) in the forest in search of a big tree which he saw (दृश्) at no great distance. He took (ग्रह्) his axe, and began (आरभ्) to work with it, when immediately a spirit presented (आविष्कृ) himself before him and begged (याच्) him not to fell the tree which he said was his abode for fifty years. The wood-cutter was at first much frightened (सं-त्रस्) at the sight of the spirit, but he summoned (अव-लम्ब्) all his courage and asked (प्रच्छ्) him what return he would make if he spared the tree. The spirit promised (प्रति-श्रु) to enrich him and to obey his orders for twelve years. The wood-cutter agreed (अनु-मन्) and returned (नि-वृत्) home full of joy. The spirit followed (अनु-सृ) him, filled (पृ) his boxes with gold and asked (अनु-युज्) him what he

was to do next. The wood-cutter wanted (इष्) a large palace to live in, which the spirit prepared (नि-र्मा) for him and furnished (पूर्) it with costly seats, bedsteads and paintings. Thus he did (वि-धा) all that the wood-cutter desired (वाञ्छ्) and waited (प्रति-ईक्ष्) for further orders.

NOTES. संक्रमणकालः–The time of passing away from the earth. (१) मूर्ते=मूर्तिमत्यौ, देवतारूपे (२) संरुणद्धि- Does not fetter them *i. e.* does not make them obsequious or servile. ऋग्यजुष-म्=ऋक् च यजुश्चैतयोः समाहारः (समाहारद्वन्द्व०). (४) ललितललितैः-Exceedingly beautiful. ज्योत्स्नाप्रायैः- As fair as the light of the moon (ज्योत्स्नायाः प्रायो येषु तैः). अकृत्रिमविभ्रमैः- With artless (and yet) graceful movements. This is said by Ráma about Sîtá when she was very young. (५) मा अगमः- This ought to be मा गमः. (६) This is said by Válmîki to Sîtá. प्रणिधानतः=योगसमाधिना 'by spiritual meditation.' विषयान्तरस्थं &c.- Your father's house only in another province (than Vîdehas). (७) गोदावरीपरिसरस्य-(गोदावरी परिसरे यस्य सः) On whose borders flows the Godávarî. तटानि- Slopes. (८) अपारीत्-from पृ *vt.* 9. P. 'to satisfy.' षड्वर्गम्-The six evil passions, viz., काम, क्रोध, लोभ, मोह, मद and मत्सर. समूलघातं &c.- Killed his enemies destroying them to the very root *i. e.* altogether eradicating them. (९) आहिताग्नेः-Who constantly preserves the sacred fire. (१०) Construe the line पितुर्नियोगाद्गार्गवेण मातरि द्विषद्वत्प्रहृतं (इति) शुश्रुवान्. (११) नाव्यम्- Which can be crossed by a boat. क्षिपद्भिः- Breaking through the waves with arms which were like other waves *i. e.* as big as the waves themselves. *At no great distance*- नातिदूरे. *To work with it*- तेन च्छेदनम्. *A spirit*- व्यन्तरः. *What return he would &c.*- कथं प्रत्युपकुर्यात्. *To obey*- निदेशे स्था, वृत् *&c.* *A box.*- मञ्जूषा.

LESSON VI.

THE AORIST (continued).

THIRD VARIETY.

51. The third variety is both Parasmai. and Atmane. The terminations are the same as those of the second variety given before, but the third variety differs from the second in the formation of its base.

The only primitive roots which belong to this variety are श्रि U., द्रु P., स्रु P. and कम् A. The roots श्वि P. and धे P. take it optionally.

Roots of the 10th Conjugation and Causals take this variety only.

52. The base is formed by reduplication in the case of primitive roots and अ is added on before which final इ and उ are changed to इय् and उव् by S. R. 39. धे and कम् form respectively the bases दध and चकम or चीकम. Thus,

Rt. श्रि P. अशिश्रियम्, अशिश्रियाव, इ० । अशिश्रियः, इ० । अशिश्रियत्, इ० ।

„ A. अशिश्रिये, अशिश्रियावहि, इ० । अशिश्रियथाः, इ० । अशिश्रियत, इ० ।

द्रु P. अदुद्रुवम्, अदुद्रुवाव, इ० । अदुद्रुवः, इ० । अदुद्रुवत्, इ० ।

धे P. अदधम्, अदधाव, इ० । अदधः, इ० । अदधत्, अदधताम् अदधन् ।

कम् A. अचकमे or अचीकमे, अचकमावहि or अचीकमावहि, इ० । अचकमथाः or अचीकमथाः, अचकमेथाम् or अचीकमेथाम्, अचकमध्वम् or अचीकमध्वम् । अचकमत or अचीकमत, अचकमेताम् or अचीकमेताम्, अचकमन्त or अचीकमन्त ।

53. (*a*) In the case of roots of the 10th Conjugation and Causals, the form of the root which it assumes before अय is taken, and after shortening its penultimate long vowel, if any, it is reduplicated. (The short vowel corresponding to ए, ऐ is इ and to ओ, औ is उ). Thus,

Rt.	तड्-ताड्-तड्-ततड्	Caus.	कारय-कार्-कर्-चकर्
	चुर्-चोर्-चुर्-चुचुर्	"	भेदय-भेद्-भिद्-बिभिद्
	धृ-धार्-धर्-दधर्	"	नायय-नाय्-नय्-ननय्
	पूज्-पूज्-पुज्-पुपुज्	"	भावय-भाव्-भव्-बभव्
	मन्त्र्-मन्त्र्-मन्त्र्-ममन्त्र्	"	कम्पय-कम्प्-कम्प्-चकम्प्
		"	बोधय-बोध्-बुध्-बुबुध्

(*b*) If the reduplicated syllable is prosodially short the अ of the reduplicative syllable is changed to इ. Thus, ततड्-तितड्, दधर्-दिधर्, चकर्-चिकर्, ननय्-निनय्, बभव्-बिभव्, but ममन्त्र्, चकम्प् remain unchanged.

(*c*) The इ or उ of the reduplicative syllable is lengthened if it is prosodially short and are followed by a reduplicated syllable which is also prosodially short, Thus,

Rt.	तड् base तीतड्	Caus.	कारय base चीकर्
	चुर् " चूचुर्	"	भेदय " बीभिद्
	धृ " दीधर्	"	नायय " नीनय्
	पूज् " पूपुज्	"	भावय " बीभव्
	मन्त्र् " ममन्त्र्	"	बोधय " बूबुध्

To the base, thus prepared, अ is added on and the terminations (Parasmai. and Atmane.) of the second variety are applied as said above. Thus,

Rt. धृ 10. U. and the Causal of भू.

	Singular.	*Dual.*	*Plural.*
P.	अदीधरम्	अदीधराव	अदीधराम
	अदीधरः	अदीधरतम्	अदीधरत
	अदीधरत्	अदीधरताम्	अदीधरन्
	अबीभवम्	अबीभवाव	अबीभवाम
	अबीभवः	अबीभवतम्	अबीभवत
	अबीभवत्	अबीभवताम्	अबीभवन्
A.	अदीधरे	अदीधरावहि	अदीधरामहि
	अदीधरथाः	अदीधरेथाम्	अदीधरध्वम्
	अदीधरत	अदीधरेताम्	अदीधरन्त
	अबीभवे	अबीभवावहि	अबीभवामहि
	अबीभवथाः	अबीभवेताम्	अबीभवध्वम्
	अबीभवत	अबीभवेताम्	अबीभवन्त

Rt. मन्त्र् 10. A.—अममन्त्रे, अममन्त्रावहि, इ० ।
Caus. of बुध् (P.)—अबूबुधम्, अबूबुधाव, इ० ।
" ह्री (P.)—अजिह्रिपम्, अजिह्रिपाव, इ० ।

54. When a root begins with a vowel, it is to be reduplicated according to Rule 4 (page 2) in forming the the base. Thus,

Caus. of	अद्	base अटिद्	Aor. 3rd Per. sing.		आटिटत्
"	आस्	" आसिस्	"	"	आसिसत्
"	इष्	" इषिष्	"	"	ऐषिषत्
"	उज्झ्	" उज्जिझ्	"	"	औज्जिझत
"	अञ्ज्	" अञ्जिज्	"	"	आञ्जिजत्
"	ईक्ष्	" ईचिक्ष्	"	"	ऐचिक्षत्
Rt.	अर्ह् 10. P.	" अर्जिह्	"	"	आर्जिहत्

Exceptions. The roots अर्थ् A., अङ्क्, ऊन् and अन्ध् form आर्तथत, आञ्चकत्, औननत् and आन्दधत respectively.

